श्रीकृष्णायनमः
श्रीगोपीजनवल्लभाय नमः
श्रीमदाचार्यचरणकमलेभ्यो नमः

तत्वार्थदीपनिबन्ध

व्रजभाषा टीका

शास्त्रार्थ प्रकरण

सर्वोद्धारप्रयत्नात्मा कृष्णः प्रादुर्बभूव ह।
तथात्वं येन संसिध्येत् तदर्थं व्यास उक्तवान्।।१।।
श्रीभागवतमत्यन्तं सर्वेषां सुखदायकम्।
तस्याऽपि तत्त्वं येनैव सिध्येदिति विचार्य हि।।२।।
अग्निश्चकार तत्वार्थदीपं भागवते महत्।
तच्चापि येन संसिध्येद् व्याख्यानं तन्निरूप्यते।।३।।

श्रीभागवततत्वार्थं प्रकटीकरिष्यन् प्रथमं शास्त्रार्थोपनिबन्धनलक्षणं मङ्गलम् आचरति नम इति.

नमो भगवते तस्मै कृष्णायाद्भुतकर्मणे।

भगवति जीवैः नमनमेव कर्तव्यं, न अधिकं शक्यम् इति सिद्धान्तः. ''किमासनं ते गरुडासनाय किं भूषणं कौस्तुभभूषणाय, लक्ष्मीकलत्राय किमस्ति देयं वागीश किं ते वचनीयमस्ति'' इत्यादिवाक्यैः परमकाष्ठापन्नं वस्तु नमस्यत्वेन निर्दिशति भगवत इति. पुरुषोत्तमाय इति अर्थः. तत्सिद्धये लोकवेदप्रसिद्धिम् आह तस्मै इति. मतभेदेन तस्य अन्यथाकल्पनाव्यावृत्त्यर्थम् आह कृष्णाय इति. सएव परमकाष्ठापन्नः कदाचित् जगदुद्धारार्थम् अखण्डः पूर्णएव प्रादुर्भूतः 'कृष्ण' इति उच्यते.

ननु पूर्वं साधनानि सिद्धान्येव सर्वत्र, तत्र अनधिकारेण साधनाभावे भगवानपि अवतीर्य किं करिष्यति? इति आशङ्कायाम् आह अद्भुतकर्मणे इति. भगवतः अद्भुतकर्मत्वम् अग्रे व्युत्पाद्यम् ''असाधनं साधनं करोति'' इत्यादि.

एवं साक्षाद्भगवत्वे हेतुम् उक्त्वा तस्य लीलाम् आह रूप इति.

रूपनामविभेदेन जगत्क्रीडति यो यतः।।१।।

रूपनामविभेदेन यः क्रीडति, रूपनामविभेदेन यो जगत्, रूपनामविभेदेन यतो जगद् इति. अनेन क्रीडायां स्वातन्त्र्यम् उक्तम्. निर्लेपत्वाय आह एतादृशं जगद् यतः इति. एवं ज्ञानेन मुच्यन्ते इति सङ्क्षेपः।।१।।

'सुलोचन' व्रजभाषा टीका

परब्रह्म पुरुषोत्तम श्रीकृष्णचन्द्रने सबन्के उद्धार करिवेकु अपनो निजस्वरूप प्रकट कियो तथा आगे होयवेवारे जीवन्को उद्धार करिवेकु महर्षि वेदव्यास कृष्णद्वैपायनजीके मुखद्वारा श्रीभागवतस्वरूपसों आप प्रगट भये. सो श्रीभागवतस्वरूप सब जीवन्कुं अत्यन्त सुखदायक हे. परन्तु श्रीमद्भागवतको ठीक-ठीक अर्थ कलिकालसों मलिनबुद्धिवारे जीव नाहीं जान सके हें ये विचारिकें ठीक-ठीक अर्थ जनायवेकु श्रीकृष्णके मुखाग्निरूप श्रीवल्लभाचार्यजीने 'तत्वार्थदीप'नामको ग्रन्थ रच्यो तथा वाकु भी स्पष्ट करिवेकु 'प्रकाश'नामसों प्रसिद्ध व्याख्यान भी आपनें ही बनायो. वा व्याख्यानकु भी स्पष्ट करिवे अर्थ

आचार्यकुलभूषण श्रीपुरुषोत्तमजी महाराजने 'आवरणभङ्ग'नामसों प्रसिद्ध व्याख्यान बनायो. साधारण भाषा जानिवे वारे बालकन्कु सुगम रीतिसों समुझायवके अर्थ अन्वयक्रमकु छोडिके निबन्ध एवं आवरणभङ्गके तात्पर्यको सङ्क्षेपसों या भषाग्रन्थमें वर्णन कियो हे.

श्रीवल्लभाचार्यजी ग्रन्थके प्रारम्भमें मङ्गलाचरण करे हें एवं या मङ्गलाचरणमें ही सङ्क्षेपसों वेद-गीता-व्याससूत्र-श्रीभागवतको सिद्धान्त भी वर्णन करे हें. नमो भगवते इति . भगवानने जीवन्कुं सर्व पुरुषार्थ दिये हें ताके प्रत्युपकारमें जीवन्के आडीसूं भगवान्के अर्थ नमस्कार ही होय सके हें याके सिवाय भगवान्को प्रत्युपकार कछू भी जीव नाहीं करि सके हे–ये शास्त्रको सिद्धान्त हे. शास्त्रमें लिख्यो हे ''जिनके गरुडजी आसन बैठवेकु हे, कौस्तुभ मणि भूषण-अलङ्कार जिनको हे, लक्ष्मीजी जिनके स्त्री हें तथा जो स्वयं वाणीके पति हें तिनको आसन, आभूषण, धन, स्तुति आदि द्वारा जीव कहा सत्कार करेगो''. या प्रकारके बहुतसे वाक्य हें. तासों जीवन्कुं नमस्कार करिवे योग्य सबसों बडे देव पुरुषोत्तमही हें. पुरुषोत्तम वो ही हे जो वेदमें लोकमें प्रसीद्ध होय. अनेक वादीजनन्नें अपने-अपने मतमें पुरुषोत्तम कछु अन्य ही मान राख्यो हे परन्तु यथार्थ विचार कियो जाय तो कृष्ण ही पुरुषोत्तम हें. सबसे बडेसों भी बडो परब्रह्म जाकु कहे हें वो ही जगत्को उद्धार करिवेकों अखण्ड पूर्णरूपसों, जितनो हे उतनोही, समग्र प्रकट भयो तब 'कृष्ण' कहायो. यहां 'कृष्ण' शब्द परब्रह्मको वाचक हे. ''यस्मात् क्षरमतीतोहम् अक्षरादपि चोत्तमः, अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः'' अर्थ : हे अर्जुन १.क्षर जो सम्पूर्ण भूत एवं २.अक्षरब्रह्म जाकी ज्ञानी उपासना करे हे–इन दोनोन्सों में उत्तम हुं. एवं लोक-वेदमें 'पुरुषोत्तम' नामसों प्रसिद्ध हुं. तथा भागवतमें ''कृष्णस्तु भगवान् स्वयम्'' या श्लोकमें भी लिखे हें.

जेसे राजा अपने पुत्रनमें लडाई देखे हे तब स्वयं आपके क्रूर स्वभाव वारे पुत्रन्कुं दूर करिके शान्त स्वभाव वारे भोले-भोले पुत्रन्कुं अपने समीप राखे हे एसें ही दैवजीव हें सो भगवान्के शान्तरूप हें आसुर जीव हें सो भगवान्के अशान्तरूप हें. जब अशान्त आसुरजीव शान्त स्वभव वारे सूधे दैवजीवन्कुं अत्यन्त दुःख देवे लगे हें तब पुरुषोत्तम अत्यन्त करुणा करिके स्वयं पूर्ण अखण्डरूपसों ही वितने देशकी माया दूर करिकें वेसें ही प्रकट होय हें जेसें काष्ठके घिसवेसों विना अग्नि लाये काष्ठमेंसों ही अग्नि प्रकट हो जाय हे. तासों केवल धर्म रक्षाके ही अर्थ पुरुषोत्तम अवतार नाहीं हे. क्योंकि धर्म रक्षा तो अंशावतारद्वारा भी कर सके हें. परन्तु जब सूर्यको उदय होवे हे तब दीपककी आवश्यकता नाहीं रहत हे क्योंकि दियाके कामकु सूर्य ही करि देत हे या ही रीति सों जब कृष्ण परब्रह्म प्रकट भये तब अंशावतारके भी कार्य आप द्वारा ही ह्वे गये. तासों कितनेक मनुष्यन्कुं अंशके कार्य देखिके कृष्णमें अंशावतारको धोखा हो जावे हे. सो ये मोह इन्द्रादिकन्कों भी भयो हतो. तब भगवान्ने गोवर्द्धन धारणादि लीलाकरिकें उनको अज्ञान दूर कर्यो हतो. और तो कहा वसुदेवजी भी एक समयमें नारदादिक ऋषिन्सों अपनो कल्याण होयवेको उपाय पूछवे लगे हते तब नारदजीने कही ''हे वसुदेवजी हम सब ऋषि लोग अपनो कल्याण अर्थ जा कृष्णके दर्शन करिवेकों आवे हें वे पूर्ण ब्रह्म कृष्ण तुम्हारे पुत्र भावकुं प्राप्त होयके सर्वदा समीप रहे हें. तुम्हारो सदा कल्याण ही होय रह्यो हे'' इत्यादि. तथा गीतामें श्रीकृष्णनेंही स्वयं आज्ञा करी हे ''अवजानन्ति मां मूढा मानुषींतनुमाश्रितम्''. अर्थात् अज्ञानी मनुष्य मेरे सदानन्द मूर्तिरूप परम भावको नाहीं जाने हें तासों मोकुं वे अज्ञानी लोग मेरे शरीरकु भी अन्य मनुष्यन्के शरीरन्की तरह रुधिर-मांसादिकन्को बन्यो जाने हें. इत्यादि शतशः वाक्यन्सों श्रीकृष्णको स्वरूप आनन्दरूप ही हे. तथा आपके गुण-कर्म-स्वभाव भी आनन्दरूप ही हें. जेसे दियाको प्रकाश दियासों अलग नाहीं होवे हे एसे गुण-कर्म-स्वभाव भी भगवानसों न्यारे नाहीं हें. कहीं-कहीं अंशावतारमें 'कृष्ण'शब्दको प्रयोग आवे हे तहां गौण समुझनो. मुख्य 'कृष्ण'नाम उनको ही हे जो स्वयं कृपा करिके जगत्को विना साधन उद्धार करिवेंके अर्थ आप्तकाम अखण्ड पूर्ण परब्रह्म अग्निकी तरह माया दूर करिके अपनो रूप दिखावे हें. यद्यपि अंश-कलावतार भी उद्धार करे हें परन्तु धर्मादि साधन बतायकें उनके द्वारा उद्धार करे हें. क्योंकि गीतामें लिखे हें ''धर्म संस्थापनार्थाय सम्भवामि युगे युगे''. यामें युगावतारको धर्मस्थापन मात्र प्रयोजन लिख्यो हे. पूर्ण ब्रह्म श्रीकृष्णचन्द्र तो अद्भुत कर्म करिवेवारे हें. काम क्रोधादिक जो मोक्षके साधन नाहीं हें उनकुं भी साधन बनायके अपने अलौकिक सामर्थ्य करिकें गोप, गोपी, कंस, गो, मृग, पशु, पक्षी आदिको उद्धार कियो. श्रीकृष्ण जो परब्रह्म नाहीं होते तो विनासाधन ज्ञानरहित जीवन्को उद्धार नाहीं करि सकते. यद्यपि कितनेक लोग कर्मकुं ही ईश्वर माने हें.

कितनेक ईश्वरकों नाहीं माने हें. वे लोग कहे हें : पदार्थन्के स्वभावसों ही जगत्को उत्पत्ति-नाश होतो जावे हे. उनके मतमें स्वभावही गुप्त रीतिसों ईश्वर भयो. ओर तो कहा कारू लोग भी विश्वकर्माकों ही ईश्वर मानत हें. ओर सब ही अपने-अपने ईश्वरकों नित्य-शुद्ध-बुद्धस्वरूपही माने हें ये बात कुसुमाञ्जलिविवेकमें उदयनाचार्यने भी लिखी हे. परन्तु ये ईश्वरके एक-एक देशके मानिवेवारे हें. जेसे बहुत अन्धे पुरुष हाथीके पास जावे हें तब कोईके हाथमें हाथीकी सूड़ आवे हे वो वाही घाटको हाथीकु जाने हे. जाके हाथमें पांव आवे हे वो हाथीको मोटो थम्भा जेसो जाने हे, जाके हाथमें पूंछ आवे हे वो लम्बो डण्डा जेसो जाने हे या रीतिसों एक-एक अङ्गगकुं हाथी मान बेठे हें. समग्र हाथीकों नाहीं जाने हें. याही प्रकार परमात्माके एक-एक देशकों यथाशक्ति ऋषि आदिक वर्णन करे हें. वेदमें सृष्टि करनो ब्रह्मको लक्षण लिख्यो हे ताको वर्णन करे हें.

रूपनाम इति. रूप-नामके भेद करिके जो क्रीडा करे हे, रूप-नामके भेद करिके जो जगत् बन जावे हे, रूप-नामके भेद करिके जासों जगत् प्रकट होवे हे अर्थात्; जगत्में जितने पदार्थ हें उन सबन्को रूप बनायके तथा उनके नाम भी बनायके रूप तथा नामके भेदसों श्रीकृष्ण ही क्रीडा कर रहे हें. पदार्थ स्वरूप तथा शब्द स्वरूप दो प्रकारको जगत् हे सो भी आप ही भये हें. अर्थात् कार्य भी आप ही हें. मृत्तिकासों जेसे घट बने हे एसें नाम तथा अर्थ रूप करिकें आपसों जगत् बन्यो हे. जगत्के उपादानकारण भी आप ही हें. अपने स्वरूपके सिवाय क्रीडामें अन्य कोई पदार्थकी अपेक्षा नाहीं हे. अर्थात् क्रीडाके पदार्थ तथा क्रीडा करिवेवारे आप ही स्वयं हें. या ही सों आप अपनी क्रीडामें परम स्वतन्त्र हें. आप श्रीभगवान्के सिवाय कोई पदार्थ नाहीं हे जामें आप आसक्त होंय. यासों आप निर्लेप हें. या रीतिके (भगवत्स्वरूपके) ज्ञानसों मोक्ष होवे हे. ये ही सर्वशास्त्रन्को निचोड हे. श्रीवल्लभाचार्यजी ग्रन्थके आदिमें एसी लीला करिवे वारे श्रीकृष्णचन्द्रकों नमस्कार करे हें।।१।।

विस्तरेण वक्तुं प्रतमतः अधिकारिणम् आह सात्त्विका इति.

सात्त्विका भगवद्भक्ताः ये मुक्तावधिकारिणः।।
भवान्तसंभवा दैवात् तेषामर्थे निरूप्यते।।२।।

स्वभावप्रकृत्यपेक्षया अधिकं विहितम् अलौकिकं ये कुर्वन्ति ते सात्त्विकाः. तत्रापि भगवत्सेवकाः सेवापराः. तत्रापि ये निष्कामाः. तएव मुक्ताधिकारिणः. तत्रापि ईश्वरेच्छया अन्तिमजन्मनि जाताः शरीरं गृहीतवन्तः. तेषां यथा अन्तिमत्वं सिद्ध्यति तथा उपायो निरूप्यते इति अर्थः।।२।।

मुक्तिके अधिकारी जीवको स्वरूप कहे हें. जे जीव अपने स्वभाव तथा आचरणसों भी अधिक शास्त्रोक्त अलौकिक कार्यकुं करते रहें, भगवत्सेवामें परायण रहें, कोई कामना नाहिं राखें, भगवान्की इच्छा करके अन्तिम जन्म जिनको भयो होय, अर्थात् जिन जीवन्कुं भगवान् आगें जन्म नाहीं दियो चाहें–एसे जीव मुक्तिके अधिकारी हें. श्रीवल्लभाचार्यजी या ग्रन्थमें एसो उपाय वर्णन करे हें जाके करिवेसों फिर जीवको जन्म न होय.

तात्पर्य ये हे आछी रीतिसों कह्यो भयो भी सिद्धान्त अधिकारीके हृदयमें स्थिर नहीं होवे हे. याहीसों व्याससूत्रन्में तथा भागवतादिकन्में अधिकारीके लक्षण वर्णन करे हें तथा गीताजीमें "इदं ते नातपस्काय" इत्यादि श्लोकन्में अनधिकारीकुं ज्ञान देवेको निषेध लिख्यो हे तेसें यहां भी सात्विक अधिकारीन्के अभिमत लक्षण वर्णन करे हें. देवतान्को यजन-पूजन करनो सात्विक जीवन्को स्वभावकार्य हे. वाकी अपेक्षा भी अधिक अच्छे कार्यकुं करे. अर्थात् १करे कर्मन्कुं भगवान्के अर्पण करते रहे तथा जहां सत्पुरूष इकट्ठे होयकें भगवान्के पराक्रमकुं जतायवेवारी तथा हृदयकर्णन्कुं रसदेवेवारी भगवत्कथा वर्णन करते होंय वहां जायके २भगवत्कथाकुं सर्वदा सुनते भये प्रशंसा करते रहें तथा द्रव्य-देह करकें भगवत्सेवा करते रहें तथा ३जिनके हृदयमें कोइ कामना नाहीं होय–कामना हे सो अधिकारीको दोष हे अर्थात् जा पुरुषमें बुद्धि, आयुष्य, दोषन्को अभाव–ये तीनों वस्तु होंय वाकु अधिकारी समुझनो. इतने गुण होंय ओर भगवान्की भी जा जीवको शीघ्र उद्धार करिवेकी इच्छा होय; केवल गुरुरूपी पार लगायवेवारे विना जा जीवकी मनुष्यदेहरूपी नाव संसारसागरके पार नहीं लागती होय; एसे जीवकी भगवान्में द्रढ आसक्ति सम्पादन करिकें शीघ्र उद्धार करिवेके अर्थ श्रीआचार्यचरणन्नें ये ग्रन्थ प्रकट कियो हे।।२।।

वक्ता स्वस्य तादृशज्ञानप्राप्तौ प्रकारम् आह भगवच्छास्त्रमाज्ञाय इति.

भगवच्छास्त्रमाज्ञाय विचार्य च पुनः पुनः।।
यदुक्तं हरिणा पश्चात् सन्देहविनिवृत्तये।।३।।

अन्यथा अनाप्तत्वं स्यात्. भगवच्छास्त्रं भागवतं, गीता, पञ्चरात्रञ्च इति. तस्य सर्वतो ज्ञानम्. भगवत्कृपादिना इति शेषः. तथापि आपाततः प्रतिपन्नं न प्रमाणमिति विचारम् आह पुनः पुनः निश्चयानन्तरमपि. ननु शतशोऽपि विचारितं जीवबुद्ध्या अप्रमाणं कदाचिद् भवतीति तदर्थम् आह यदुक्तम् इति. हरिणा सर्वदुःखहर्त्रा श्रीजगन्नाथेन श्रीपुरुषोत्तमस्थितेन मोहकसर्वशास्त्रोत्पत्यनन्तरं यन्निर्धारकवाक्यम् उक्तं तदपि ज्ञात्वा इति।।३।।

श्रीवल्लभाचार्यजी आज्ञा करे हें : हमनें श्रीगीताजी, भागवत, नारदपंचरात्र इनको अर्थ भगवत्कृपा करिकें आछी रीतिसुं जान्यो. फिर वारंवार विचार करिके तात्पर्यको निश्चय भी कियो. तदुपरान्त मोहकशास्त्र देखवेसों जे जीवन्कों अनेक प्रकारके संदेह भये तिनके दूरि करिवेके अर्थ श्रीजगन्नाथरायजीनें जो वचनामृत आज्ञा कियो वाके उपर द्रढ विश्वास राखिके तथा दैवी जीवन्कुं भी ये सिद्धान्त जतायवेके अर्थ या ग्रन्थकु प्रकट करे हें।।३।।

तदेव आह एकं शास्त्रम् इति.

एकं शास्त्रं देवकीपुत्रगीतम् एको देवो देवकीपुत्रएव।।
मन्त्रोऽप्येकस्तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा।।४।।

अत्र आख्यायिका पारम्पर्यादेव अवगन्तव्या. देवकीपुत्रेण गीतं गीता. गीतायां भगवद्वाक्यान्येव शास्त्रम् इति अर्थः. वेदानामपि तदुक्तप्रकारेणैव अर्थनिर्णयः. उपास्यनिर्धारम् आह एको देवो इति. मूलभूतो अयम् इति अर्थः. सर्वदा स्मरणार्थं साधनम् आह मन्त्रोऽप्येकः इति. कर्तव्यम् आह तस्य इति. न मनुष्यत्वेन ज्ञातव्यः इति आह देव इति. सेवैव कर्तव्या. शास्त्रम् अवगत्य मनोवग्देहैः कृष्णः सेव्यः इति अर्थः।।४।।

श्रीजगन्नाथरायजीनें जो ''एकं शास्त्रं देवकीपुत्रगीतम्'' इत्यादि श्लोक आज्ञा कियो हे ताकी कथा या रीतिसों प्रसिद्ध हे. मायावादी तथा ब्रह्मवादी दोनों उत्कलदेशके राजाकी सभामें विवाद करिवे लगे.
विवाद करते सात दिन होय गये परन्तु कोइको भी जय नाहीं भयो. तब ये निश्चय भयो जो श्रीजगन्नाथरायजीके मन्दिरमें प्रश्न लिखिकें पत्र धर देनों चहिये. तब वा ही दिन सायंकालके समय चार प्रश्न एक पत्रमें लिखिकें सबन्के समक्ष मन्दिरमें पत्र धरि दियो. प्रातःकाल वा पत्रमें एक श्लोक लिख्यो निकस्यो. सो श्लोक ''एक शास्त्रं देवकीपुत्रगीतम्'' इत्यादि मूलमें लिख्यो हे. ताको अर्थ. देवकी पुत्र श्रीकृष्णकी आज्ञा करी जो गीता हे वो ही एक शास्त्र हे. देवकीपुत्र श्रीकृष्ण ही एक देव हें. देवकीपुत्र श्रीकृष्णके जितने नाम हें वे ही मन्त्र हें. देवकीपुत्र श्रीकृष्णकी सेवा हे वो ही कर्म हे.

या श्लोकमें चारों प्रश्नन्को उत्तर लिख्यो आय गयो. सभासदन्नें या उत्तरकुं मानि लियो परन्तु मायावादीन्ने कही जो ये श्लोक तो तुमारो बनायो भयो हे. तब तो राजाने वा दिन मायावादीके ही आगें वानें कही वा रीतिसों पत्र मन्दिरमें घरके वाके समक्ष कपाट बन्ध किये. प्रातःकाल मायावादीके ही आगें कपाट खोले. पत्र मायावादीके आगें ही लायके बांच्यो. वामें ये श्लोक निकस्यो ''यः पुमान् पितरं द्वेष्टि तं विद्यादन्यरेतसम्, यः पुमान् श्रीहरिं द्वेष्टि तं विद्यादन्त्यरेतसम्''. अर्थ : जो पुरुष पिताके साथ द्वेष करे हे वाकुं अन्यके वीर्यसों पैदा भयो जाननों. जो पुरुष श्रीहरिसों द्वेष करे हे वाकुं नीचवर्णके वीर्यसों उत्पन्न भयो जाननों. श्लोक सुनत ही मायावादी तो लज्जित ह्वे गयो. राजाने मायावादीकी माताकुं बड़ो भय देके पूछी तब वानें कही जो ''म्लेच्छ धोबीसों मेरे गर्भ रहि गयो हतो''. फेरि राजाने वाकुं अपने देशमेंसों निकास दियो. ये इतिहास जगन्नाथपुरीमें अभी तक परम्परासों प्रसिद्ध चल्यो आवे हे।।४।।

एवं स्वयं ज्ञात्वा लोकज्ञापनार्थं शास्त्रं कथयन् बुद्धिसौकर्यार्थं प्रकरणत्रयम् आह इत्याकलय्य इति.

इत्याकलय्य सततं शास्त्रार्थः सर्वनिर्णयः।।

श्रीभागवतरूपं च त्रयं वच्मि यथामति।।५।।

सततम् इति मध्ये विरोधिज्ञानाभावः. शास्त्रार्थो गीतार्थः. सर्वस्यापि ज्ञानेदेः निर्णये द्वितीयः. असम्भावना-विपरीतभावनानिवृत्त्यर्थं द्वितीयम्. शास्त्रार्थस्य सङ्क्षेपरूपत्वाद् विस्तारार्थं भागवतरूपं तृतीयं प्रकरणम् यत्र भागवतं निरूप्यते. चकरात् मीमांसाद्वयभाष्यं, प्रकरणानि, भागवतटीका च गृहीता. त्रयम् एतद् उपदेशन्यायेन कथयामि।।५।।

या प्रकार स्वयं ज्ञान प्राप्त करके लोगन्कों बतायवेके अर्थ बोधसौकर्यार्थ तीन प्रकरणकी रचना करे हें. समुझिवेमें सुगमता पडे याके अर्थ या निबन्धग्रन्थमें तीन प्रकरण राखें हें. प्रथम शास्त्रार्थप्रकरण हे; तामें श्रीगीताजीको अर्थ हे. दूसरो सर्वनिर्णयप्रकरण हे; तामें असम्भावना-विपरितभावना दूरि करिवेके अर्थ सब पदार्थन्को निर्णय कियो हे. तीसरो श्रीमद्भागवतरूप प्रकरण हे; तामें श्रीभागवतके शास्त्रार्थ, स्कन्धार्थ, प्रकरणार्थ तथा अध्यायार्थ को निरूपण हे।।५।।

परिभाषाम् आह वेदान्ते इति सार्द्धेन.

वेदान्ते च स्मृतौ ब्रह्मलिङ्गं भागवते तथा।।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।।
त्रितये त्रितयं वाच्यं क्रमेणैव मयात्र हि।।६।।

निर्गलितवस्तुज्ञापकं लिङ्गं 'ब्रह्म'इत्यादिपदं तत्र-तत्र सिद्धं मयापि परमकाष्ठापन्नवस्तुबोधार्थं तत्तत्प्रकरणे वक्तव्यम् इति अर्थः।।६।।

ग्रन्थके आदिमें सङ्केत कहे हें श्रीमत्परमकाष्ठापन्न परमेश्वरको वेदान्तमें 'ब्रह्म' नाम प्रसिद्ध हे. स्मृतिमें 'परमात्मा' नाम हे. श्रीभागवतमें 'भगवान्' नाम हे. या ग्रन्थके तीनों प्रकरणमें क्रमशः ब्रह्म, परमात्मा तथा भगवान् को निरूपण होयगो.

श्रीमहाप्रभुजी आज्ञा करे हें हम भी या ही रीतिसों शास्त्रार्थप्रकरणमें 'ब्रह्म' कहेंगे, सर्वनिर्णयप्रकरणमें 'परमात्मा' कहेंगे, श्रीभागवतरूप प्रकरणमें 'भगवान्' नामसों वर्णन करेंगे।।६।।

अस्मिन् शास्त्रे परिभाषाम् उक्त्वा प्रमाणम् आह वेदाः इति.

वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि।।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम्।।७।।

शब्दएव प्रमाणम्. तत्रापि अलौकिकज्ञापकमेव. तत् स्वतःसिद्धप्रमाणभावं प्रमाणम्. वेदाः सर्वएव काण्डद्वयस्थिता अर्थवादादिरूपाअपि. स्मृतित्वेन कृष्णवाक्यानि वेदत्वेऽपि पृथग् उक्तानि. व्याससूत्राणि चकारात् जैमिनिसूत्राणि च. एवकारेण व्याससूत्राविरोधेनैव तदङ्गीकरणम्. हि युक्तश्च अयम् अर्थः, उपजीव्यत्वात्. व्यासस्य समाधिभाषा भागवतम्. तत्रापि यन् न लौकिकरीत्या वदति. यथा ''अथौषस्युपवृत्तायाम्'' (भाग.पुरा.१०।७०।१) इत्यादि. नापि परमतरीत्या ''श्रुतं द्वैपायनमुखात्'' (भाग.पुरा.६।१४।९) इत्यादि. यावत् समाधौ स्वयम् अनुभूय निरूपितं सा समाधिभाषा. एतच्चतुष्टयम् एकवाक्यतापन्नं प्रमाजनकम् इति अर्थः।।७।।

या भगवत्सिद्धान्तके दृढ करिवे वारे चारि प्रमाण हें. १. संहिता-ब्राह्मण सहित चारि वेद, २. श्रीगीताजीमें श्रीकृष्णके वचनामृत ३. श्रीवेदव्यासजीके रचित ब्रह्मसूत्र ४. श्रीमद्भागवतमें व्यासजीनें समाधि चढायकें अनुभव करिके जो वाणी कही हे वो समाधिभाषा चतुर्थ प्रमाण हे. इन चारों प्रमाणन्के मेलसों जो सिद्ध होय वाहीकों ठीक समुझनो. प्रत्यक्ष, अनुमान, एतिह्य तथा शब्द इन चारि प्रमाणन्में शब्द प्रमाण हे सो सबन्सों बडो हे. शब्दप्रमाणमें भी अलौकिक पदार्थको जतायवे वारो जो

शब्द हे सो ही मुख्य प्रमाण हे. एसो शब्द वेद ही हे. तासों वेद ही मुख्य प्रमाण हे. लोकसुं नाहीं जान्यो जाय एसो जो धर्म वाकुं जतायवे वारो वेद ही हे. वेदोक्त जो

धर्म तथा वेदोक्त जो ब्रह्म को स्वरूप हे वाकुं अन्य प्रमाण नाहिं जताय सके हें. वेदके वाक्यमें कोई स्थानमें जो अयोग्यता प्रतीत होवे हे सो जानवे वारेकी बुद्धिके दोषसों प्रतीत होवे हे. जेसे वेदमें लिख्यो हे ''ग्रावाणः प्लवन्ते'', अर्थ : पाषाण तरते हें; इत्यादि वाक्यनकुं भी झूठे नहीं मानने. क्योंके वेद हे सो भूत-भविष्यत्-वर्तमानकालके जानिवे वारे इश्वरके वाक्य हें. तासों आगें होयवे वारे वृतान्तको भी वेदमें वर्णन कियो हे. रामावतारके समयमें समुद्रमें सेतु बंध्यो तब पाषाणके तिरवेको सबन्को प्रत्यक्ष अनुभव भयो. या ही प्रकार वेदके अन्य वाक्यनकुं भी यथार्थ ही मानने. अपनी मलिन बुद्धिके अनुसार वेदके वाक्यन्को उलटो अर्थ नहीं करनो. या सिद्धान्तमें अर्थवादकुं भी प्रमाण माने हें. गीताजीमें भी भगवान्के वाक्य हें तासों गीताजी वेदरूप ही हें. परन्तु अर्जुनके अधिकारानुसार कहे गये हें तासों स्मृतिरूप हें. ''स्मृतेश्च'' या व्याससूत्रमें स्मृतिकी प्रमाणता लिखी हे. विष्णुपुराणमें ''वेदाः प्रतिष्ठिताः सर्वे पुराणेषु न संशयः'' या वाक्यमें पुराणन्में सब वेद स्थित हें ये बात लिखी हे. तासों सब पुराणन्में श्रीभागवत प्रमाण हे. तामें भी समाधिभाषा परम प्रमाण हे. श्रीभागवत हे सो भी भगवद्वाक्य हे तासों वेदरूप ही हे. परन्तु स्त्री-शूद्रादिकन्को उद्धार करिवेके अर्थ पुराणमें गणना कियो गयो हे।।७।।

ननु चतुर्णां क्व उपयोगः? एकेनैव चरितार्थत्वात् च इति आशङ्क्य आह उत्तरम् इति.

उत्तरं पूर्वसन्देहवारकं परिकीर्तितम्।।

अविरुद्धं तु यत्त्वस्य प्रमाणं तच्च नान्यथा।।

उत्तरोत्तरं पूर्व-पूर्वस्य सन्देहवारकं प्रकर्षेण कीर्तितम्. यथा ''अपाणिपादो जवनो ग्रहीता'' (श्वेता.उप.३।१९) इति अत्र किं प्राकृतपाणिपादरहितं ब्रह्म आहोस्वित् सामान्यनिषेधः? इति सन्देहे ''सर्वतः पाणिपादान्तम्'' (भग.गीता१३।१३) इत्यादि गीतावाक्यं निर्णायकम्. तथा गीतायां ''नित्यः सर्वगतः स्थाणुः'' (भग.गीता२।२४) ''ममैवांशो जीवलोके (भग.गीता१५।७) इत्यादिषु सन्देहे सूत्रैः निर्णयः ''उत्क्रान्तिगत्यागतीनाम्'' (ब्रह्मसू.२।३।१९) इत्यादिभिः. तथा ''जन्माद्यस्य यतः'' (ब्रह्मसू.१।१।२) इति सन्देहे 'अन्वयव्यतिरेकतः' इति भागवतेन निर्णयः. एतदविरोधेनैव मन्वादीनां प्रामाण्यम् आह अविरुद्धम् इति.

चार प्रमाण मानिवेको कारण ये हे जो आगेको प्रमाण पहिले प्रमाणके सन्देह दूरि करिवे वारो हे. जेसे के वेदको सन्देह गीताजीसों दूर करनो. वेदमें लिखे हें ''अपाणिपादो जवनो गृहिता'' अर्थःब्रह्मके पांव नाहीं हें तोहु चले हे तथा हाथ नाहीं हें तोहु ग्रहण करले हे. या श्रुतिमें सन्देह होय हे के ब्रह्मके हाथ-पांव सर्वथा ही नहीं हें अथवा अलौकिक हाथ-पांव हें? अर्थात् लोकमें जेसे हाथ-पांव होय हें तेसे हाथ-पांव नाहीं हें तासों वेदमें बिना हाथ-पांव वारो कह्यो हे? या सन्देहको निर्णय श्रीगीताजीमें लिख्यो हे. ''सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखम्''. अर्थ : परमात्माके श्रीहस्त तथा चरणारविन्द सर्व ठिकाने विद्यमान हें. तथा हस्त-चरणन्को अन्त भी सर्व ठिकाने वर्तमान हे. या गीतावाक्यसों स्पष्ट जान्यो जाय हे के परब्रह्म परमात्माके लौकिक हाथ-पांव नहीं हें. क्योंके लौकिक हाथ-पांव होंय तो सर्व ठिकाने नहीं रहि सकें. तासों परमात्माके हस्त-चरण अलौकिक हें एसें समुझनो चहिये.

एसें ही जब गीताजीमें हु सन्देह होय ताको निर्णय व्याससूत्रन्सों करनो. जेसे गीताजीमें लिख्यो हे ''नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः'' अर्थ : जीव नित्य, व्यापक, चेष्टा रहित, अचल तथा सनातन हे. तथा दूसरे ठिकाने गीताजीमें लिख्यो हे ''ममैवांशो जीवलोके जीवभूत सनातनः'' अर्थःजीवलोकमें जो जीव हे सो मेरो ही सनातन अंश हे. अब इन दोउ वाक्यन्के देखिवेसों सन्देह होवे हे के जीवकु यदि व्यापक माने हें तो वो अंश नहीं होय सके हे. याको निर्णय ''उत्क्रान्तिगत्या गतीनाम्''

(ब्रह्मसूत्र२।३।१९) या व्याससूत्रसों होवे हे. या सूत्रको अर्थःजीव उत्क्रमण करे हे अर्थात् या देहसों इन्द्रियन्के छिद्रमें होयके निकसे हे तथा ये जीव गमन करे हे तथा आगमन करे हे. अर्थात् अन्य लोकन्में जावे हे तथा अन्य लोकन्सों यहां आवे हे. या सूत्रसों स्पष्ट जान्यो जाय हे के जीव अंश हे व्यापक नाहीं हे. जीवकु यदि व्यापक मानें तो जायवो-आयवो नाहीं बन सके. आकाश, जेसे, व्यापक हे तासों आकाशको जायवो-आयवो नाहीं मान्यो जाय हे. ओर गीतामें जीव व्यापक हे एसें जो लिख्यो हे सो ताको निर्णय आगे ''व्यापकत्व श्रुतिस्तस्य'' या श्लोकमें लिखेंगे.

याही रीतिसों व्याससूत्रमें लिख्यो हे के ''जन्माद्यस्य यतः'' (ब्रह्मसू.१।१।२)) अर्थःब्रह्म हे सो जगत्की उत्पत्ति-स्थिति-नाशके करिवे वारो हे. यामें सन्देह होय हे के जगत् हे सो माया सहित ब्रह्मको बनायो भयो हे अथवा शुद्ध ब्रह्म ही या जगत्को कारण हे? शुद्ध ब्रह्म ही जगत्को बनायवे वारो हे ताको निर्णय ''अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा'' (भाग.पुरा.२।९।३५) श्लोक सों होवे हे. अर्थःब्रह्मको जगत्में अन्वय हे जेसे मृत्तिकाको घटमें अन्वय हे. अर्थात् जितने घड़ा हें उन सबमें मृतिका प्रविष्ट होय रही हे. घड़ाको कोई अंश एसो नाहीं हे जामें मृतिका नहीं होय–ये ही मृत्तिकाको घटमें अन्वय हे. या ही प्रकार जगत्में कोई अंश एसो नहीं हे जामें ब्रह्म प्रविष्ट नहीं होय. अर्थात् सत्-चित्-आनन्दरूप ब्रह्म जगत्में जितने भी छोटे-बड़े पदार्थ हें उन सबमें विद्यमान हे. जेसें घड़ामें ''ये घड़ा हे'' ये जो अनुभव हे याहीसों 'अस्ति'को (अर्थात् ब्रह्मके सत् धर्मको) अनुभव कहे हें. घड़ाकी ज्ञानमें आयवेकी ज्यो सामर्थ्य हे सो ब्रह्मको 'चित्' धर्म हे. याकों 'भाति' कहे हें. घडामें जो आछो हे सो आनन्द हे याहीसों 'प्रियम्' कहे हें. याही रीतिसों जगत्के सर्व पदार्थमें ''पटोऽस्ति'' ''पटो भाति'' ''पटः प्रियम्'' या प्रकारसों सच्चिदानन्दरूप ब्रह्मको अनुभव होवे हे तासों सर्वत्र ब्रह्म व्याप्त हे–ये ही ब्रह्मको जगत्मे समन्वय हे. या ही प्रकार ब्रह्मको जगत्के साथ व्यतिरेक भी हे जेसें घटके साथ मृत्तिकाको व्यतिरेक हे. अर्थात् कुण्डा, बटेरा आदि जितने पदार्थ हें उनमें भी रहे हे तथा इन सब पदार्थन्सों अधिक भी बहुत मृत्तिका हे–ये ही घटके साथ मृत्तिकाको व्यतिरेक हे. केवल अन्वय वारो होय सो कारण नहीं होय हे (क्योंके) जगत्को भी जगत्में अन्वय हे; केवल व्यतिरेक वारो होय सो भी कारण नहीं होय हे (क्योंके) खपुष्पको जगत्के साथ व्यतिरेक हे किन्तु अन्वय-व्यतिरेक ये दोनों जाके घटते होंय वो कारण होवे हे. यासों निश्चय होय हे के शुद्ध ब्रह्म ही जगत्को कारण हे. ''जन्माद्यस्य यतः'' ''शास्त्रयोनित्वात्'' इन सूत्रन्में भी शुद्ध ब्रह्म जगत्के प्रति कारण हे या बातको वर्णन हे. वेद, गीता, व्याससूत्र तथा भागवतकी समाधिभाषा इन चारि प्रमाणन्सों मिलते भये ही मनुस्मृति आदि प्रमाण हें.

वेदादिना अविरुद्धमेव मन्वादिकं प्रमाणम्. क्वचित् संवादः क्वचिद् विरोधः इति उभयसम्भवे अप्रमाणमेव इति आह एतद्विरुद्धम् इति.

एतद्विरुद्धं यत् सर्वं न तन्मानं कथञ्चन।।८।।

जा शास्त्रमें इन चारों प्रमाणन्सों कितनीक मिलती बातें होंय तथा कितनीक बातें बिना मिलती भी होंय वा शास्त्रकी पूर्णरीत्या प्रमाणता नहीं हे. जहां तांई या जीवकु ब्रह्मको ज्ञान नहीं होय तहां तांई इन चार प्रमाणन्की एकवाक्यतानुसार ही निर्णय करनो. पूरो ब्रह्मज्ञान होय जाय ता पीछे तो वाणिमात्र प्रमाण हे. क्योंके ब्रह्मज्ञानीकुं जेसें सब पदार्थ भगवान्के रूप दीखे हें तेसें ही सब शब्द भगवान्के नाम दीखें हें।।८।।

एवं पूर्णज्ञानोदयावधि यद् ग्राह्यं प्रमाणत्वेन तन् निरूप्य तदनन्तरं यत् प्रमाणं तद् आह अथवा इति.

अथवा सर्वरूपत्वात् नामलीलाविभेदतः।।
विरुद्धांशपरित्यागात् प्रमाणं सर्वमेव हि।।९।।

वाङ्मात्रमेव प्रमाणम्, अर्थस्य भगवद्रूपत्वात्. तदेव आह सर्वरूपत्वात् इति. रूपलीलावत् नामलीलाया विभेदानां वक्तव्यत्वात् नानाविधानि वाक्यानि प्रवृत्तानि. विरुद्धवाक्यत्वेनैव परस्परं भासमानेषु अविरोधप्रकारम् आह

विरुद्धांशपरित्यागाद् इति. विरुद्धांशपरित्यागो द्वेधा वक्तव्यः १भगवत्सामर्थ्येन अलौकिकप्रकारेण २भगवतः सर्वरूपत्वेन वा. अतो युक्तएव अविरोधः।।९।।

या तरेहसुं जहां तांई पूर्ण ब्रह्मज्ञान नहीं होय तहां तांइ व्यवहारसिद्धिके अर्थ चार प्रमाण माननें. अब जहां एक ही भगवान्के स्वरूपको शास्त्रके कोई वाक्यमें शिव रूपसों वर्णन हे, कोई वाक्यमें विष्णु रूपसों वर्णन हे, कोई ठिकानें निराकार रूपसों वर्णन हे, कोइ ठिकानें साकार रूपसों वर्णन हे–या प्रकारके अनेक विरोध शास्त्रमें दीखवेमें आवे हें तहां भगवान्को अलौकिक सामर्थ्य जानिके अथवा भगवान् सर्वरूप होय सके हे एसें जानिके विरोध दूर करनो. भगवान्ने अपनी अलौकिक सामर्थ्यद्वारा छोटेसे अपने स्वरूपमें आखे ब्रह्माण्डके दर्शन यशोदा माताकुं कराये हें या ही प्रकारसुं कंस मामाजीकी सभामें भगवान्ने अपनी सर्वरूपता दिखाई हे. वहां मल्लन्कुं वज्रसे दीखे हें, स्त्रियन्कुं कामदेव दीखेहें, वसुदेव–देवकीकुं बालक दीखे हें, कंसकुं कालरूप दीखे हें. एसे ही अन्य ठिकानें भी समुझ लेनो. सत्य युगमें तो धर्ममें सन्देह ही नहीं होतो हतो।।९।।

उक्तमानचतुष्टयविरोधे मन्वादिस्मृतीनाम् अप्रामाण्यमेव इति उक्तम्, तन् न युक्तम् ''यद्वै किञ्चन मनुरवदत् तद् भेषजम्'' (तैत्ति.सं.२।२।१०।२) इति श्रुतेः मन्वादीनाम् उक्तमानविरोधेऽपि प्रामाण्यस्य अवश्यवाच्यत्वाद् इति आह द्वापरादौ तु इति.

द्वापरादौ तु धर्मस्य द्विपरत्वाद् द्वयं प्रमा।।
विरुद्धवचनानां च निर्णयानां तथैव च।।१०।।

चोदनाविषयत्वेन अवश्यकर्तव्यताकत्वेन अभिमतो अर्थो अत्र 'धर्म'शब्देन उच्यते. तस्य द्वे श्रुति–स्मृती उभेऽपि परे प्रमापिके यस्य तादृशत्वात् द्वयं श्रुतिः तत्संवादिनी असंवादिनी च मन्वादिस्मृतिश्च एतद् द्वयमपि प्रमा प्रमाणम् इति अर्थः. यद्वा पूर्वोक्तधर्मस्य उक्तरीत्या द्विपरत्वात् श्रुतिसंवादिनि असंवादिन्यपि स्मार्ते धर्मे कर्तव्यताज्ञानं प्रमा इति अर्थः. विरुद्धयोः अविरोधख्यापनार्थं साम्प्रतं लौकिकं दृष्टान्तम् आह विरुद्धवचनानाम् इति. यथा स्मृतिवाक्यानि परस्परं विरुद्धानि स्मृतिव्याख्यानकारैः अविरोधप्रकारेण निर्णीयन्ते तथा निर्णयानामपि परस्परविरुद्धानां वैष्णवस्मार्तादिभेदेन अविरोध इति अर्थः।।१०।।

पूर्वमें कहे गये चारि प्रमाणन्सों विरोध होयवे पर मनु आदि स्मृतिन्कुं प्रमाण नाहीं माननी एसे जो कही सो ठीक नाहीं हे क्योंके श्रुतिमें ही कह्यो हे जो मनुने जो कछु कह्यो हे सो औषधकी भांति कल्याणकारी हे. तासुं उपर्युक्त चारि प्रमाणन्सों विरोध होयवे पर भी मनु आदि स्मृतिन्कुं प्रमाण माननी–एसे जो कोई कहे तो वाको समाधान द्वापरादौ तु या श्लोकसुं करत हें.

अर्थ : द्वापरके प्रारम्भमें धर्मके श्रुतिपरक तथा स्मृतिपरक या तरेहसुं द्विपरक हो जायवेसुं अवश्यकर्तव्य–शास्त्राज्ञारूप जो धर्म वाके विषयमें श्रुति तथा स्मृति दोउ प्रमाण हें. या ही प्रकारसुं परस्पर विरोधी वाक्य तथा निर्णय में दोउ प्रकारके वाक्य तथा दोउ प्रकारके निर्णय हु प्रामाणिक हें.

द्वापरयुगमें मनुष्यकी बुद्धि मलिन होयवेसों धर्ममें सन्देह भयो. तब श्रुति–स्मृति दो प्रमाणन्के द्वारा धर्मको निर्णय भयो. या विषयमें मत्स्यपुराणके प्रमाण आवरणभङ्गमें दिखाये हें. अर्थात् द्वापरादिमें धर्मके ज्ञानमें श्रुति तथा स्मृति दोनों प्रमाण हें. आशय ये हे के द्वापरादिमें धर्मके द्विपरक होयवेसुं वा धर्मके विषयमें १.श्रुति तथा श्रुतिसंवादिनी एवं श्रुतिविसंवादिनी मनु आदि २.स्मृति ये दोउ प्रमाण हें. अथवा आगे कहे गये विधिरूप धर्मके श्रुतिपरक एवं स्मृतिपरक होयवेसुं श्रुतिसंवादी एवं श्रुतिविसंवादी दोउ प्रकारके स्मार्त धर्मन्को अनुष्ठान करिवे योग्य होयवेको ज्ञान प्रामाणिक हे.

पूर्णज्ञानको उदय भयो न होय एसी अवस्थामें विरोधी वाक्यन्में अविरोध केसे सिद्ध करनो ताको प्रकार बतायवेके अर्थ लौकिक दृष्टान्त देत हें. जेसे स्मृतिवाक्यन्को विरोध स्मृतिकार व्यवस्था करके निवृत्त करिदे हें एसे ही जिन निर्णयन्में परस्पर विरोध होय वहां भी वैष्णव-स्मार्तादि भेदसों व्यवस्था कर लेनी।।१०।।

अत्र प्रमाणचतुष्टये श्रुतिः सूत्राणि एकाः कोटि, गीता भागवतश्च अपरा स्पष्टैव. तत्र उभयत्र प्रमेयभेदाभावे द्वयनिरूपणार्थं भेदे विरोधइति कथम् एकवाक्यता? इति आशङ्क्य द्वयं समर्थयितुम् आह यज्ञरूपःइति.

यज्ञरूपो हरिः पूर्वकाण्डे ब्रह्मतनुः परे।।
अवतारी हरिः कृष्णः श्रीभागवत ईर्यते।।११।।

''यः सर्वज्ञः सर्वशक्तिः'' इति श्रुतेः, ज्ञानक्रियोभययुतः सर्वेषाम् अर्थः. तत्र क्रियायां प्रविष्टः क्रियारूपो यज्ञात्मा पूर्वकाण्डार्थः. ज्ञाने प्रविष्टो ज्ञानात्मा ब्रह्मरूपः उत्तरकाण्डार्थः. 'तनु'शब्दः साकारब्रह्मप्रतिपादनाय. परे उत्तरस्मिन् काण्डे. क्रिया ज्ञानं च, द्वयं प्रकटीकृत्य यो अवतीर्णः कृष्णः स श्रीभागवते विशिष्टो निरूप्यते. अतः खण्डशो निरूपणं वेदे, भागवते तु समुदायेन निरूप्य तस्य लीला अनेकविधा निरूप्यन्तइति एकार्थत्वेऽपि पृथग्वचनं युक्तम् इति अर्थः।।११।।

माने भये चार प्रमाणन्में दो विभाग हें. एक विभागमें तो वेद तथा सूत्र एवं दूसरे विभागमें श्रीभागवत तथा श्रीगीताजी. तहां वेदके दो विभाग हें:१.पूर्वकाण्ड तथा २.उत्तरकाण्ड. तहां पूर्वकाण्डोक्त क्रियामें भगवान्नें प्रवेश कियो तब आप क्रियारूप होयकें वेदमें 'यज्ञ'नामसों प्रसिद्ध भये. तासों यज्ञरूपी भगवान् पूर्वकाण्डको अर्थ हें. एसें ही उत्तरकाण्ड जो उपनिषद् हे उनमें भगवान्नें ज्ञानमें प्रवेश कियो तब आप ज्ञानरूप होयकें वेदान्तमें 'ब्रह्म'नामसों प्रसिद्ध भये. तासों ब्रह्मरूप भगवान् उत्तरकाण्डको अर्थ हे. श्रीगीताजी तथा श्रीभागवतजी में क्रिया तथा ज्ञान ये दोउ धर्म सहित जिननें अपनो स्वरूप प्रकट कियो हे उन मूलरूप श्रीकृष्णचन्द्रको वर्णन हे।।११।।

वेदे पुराणे च क्वचिद् अन्यार्थप्रतिपादनम् आशङ्क्य तेषाम् अङ्गत्वम् इति अभिप्रायेण आह सूर्यादिरूपधृग् इति.

सूर्यादिरूपधृक् ब्रह्मकाण्डे ज्ञानाङ्गमीर्यते।।
पुराणेष्वपि सर्वेषु तत्तद्रूपो हरिस्तथा।।१२।।

ब्रह्मकाण्डे ज्ञानसिद्ध्यर्थम् उपासनाः निरूप्यन्ते. तत् चित्तशुद्धिद्वारैव इति केचित्, फलदानद्वारा माहात्म्यप्रतिपादनेन भक्तिद्वारा इति सिद्धान्तः. तथा पुराणोक्तानां दुर्गा-गणपतिप्रभृतीनां विशिष्टशेषत्वम् आवरणदेवतात्वेन. तथापि भिन्नार्थत्वम् आशङ्क्य तत्तद्रूपो हरिस्तथा इति उक्तम्. साधनरूपः फलरूपश्च स्वयमेव इति एकवाक्यता।।१२।।

वेद तथा पुराणन् में क्वचित् श्रीकृष्णसुं भिन्न एसे अन्य देवतान्के उपास्य होयवेको प्रतिपादन देखिवेमें आवे हे एसी शङ्का करिके वाको समाधान आगेके श्लोकसुं करे हें जो वे उपास्य देवता ज्ञानके अङ्गभूत हें.

श्लोकार्थ : सूर्यादिरूपधारी हरि ज्ञानकाण्डमें ज्ञानके अङ्ग कहे गये हें. वाही प्रकारसुं सभी पुराणन्में भी उन-उन पुराणन्में वर्णित विभिन्न उपास्य देवतान्को रूप धारण करिवे वारे हरि ज्ञानके अङ्ग ही हें.

शङ्का : उत्तरकाण्डमें यदि ज्ञानरूप भगवान्को ही वर्णन हे तो सूर्य वायु आदि देवतान्की उपासना क्यों लिखी? तासों जा स्थलमें उपासनान्को वर्णन हे ता स्थलकुं उपासनाकाण्ड कहनो चैये.

समाधान : उपासनाकाण्ड जुदो नहीं हे. सूर्य, वायु आदिरूप भगवान्नें ही धारण करे हें. उन रूपन्की उपासना करिवे वारेंन्कुं शास्त्रानुसार फल देकें श्रीकृष्ण अपनो महात्म्य जतावे हें. माहात्म्य जानिवेसों आपके विषे भक्ति होय हे. भक्तिसों ज्ञान होवे हे. या प्रकारसों ब्रह्मज्ञान होयवेके अर्थ ही उपासनाको वर्णन हे. तासों उपासनाको उत्तरकाण्डमें ही अन्तर्भाव हे.

एसें ही पुराणन्में जो दुर्गा, गणपति आदि देवतान्की उपासना लिखी हे तथा ब्रह्मके समान जगत्की उत्पत्ति-रक्षा-संहार करिवेकी सामर्थ्य लिखी हे सो पूर्ण क्रिया-ज्ञानशक्तियुक्त जो मूलरूप परब्रह्म श्रीकृष्ण जिनको श्रीभागवतमें वर्णन किये हें तिनको महात्म्य उपासकन्कुं वाञ्छित फल देकें जतावे हें. ओर माहात्म्यज्ञानके द्वारा मूलरूपकी भक्तिके बढायवे वारी हे तासों स्वयं भगवान्नेही दुर्गा गणपति इत्यादि अनेक साधनरूप धारण करे हें।।१२।।

अत्र अवान्तरनिर्णयं वक्तुं भक्तिमार्गे विशेषम् आह भजनं सर्वरूपेषुइति.

भजनं सर्वरूपेषु फलसिद्ध्यै तथापि तु।।
आदिमूर्तिः कृष्ण एव सेव्यः सायुज्यकाम्यया।।१३।।

ज्ञानमार्गे न कोऽपि विशेषः क्वापि, सर्वस्यापि पूर्णब्रह्मत्वात्. वक्ष्यति च ''अखण्डं कृष्णवत् सर्वम्'' (तत्व.नि.सर्व.१८२) इति. भक्तिमार्गे तु न तथा. यथा भगवान् जगत् कृतवान् तथा स्वार्थं भक्तिमार्गमपि पृथक् कृतवान्. विभूतिरूपेषु साधनानि फलानि च व्यवस्थया कृतानि, पूर्णफलदानं च स्वस्मिन्. अतो भजनं मूलरूपएव कर्तव्यम्. ''ब्रह्मविदाप्नोति परम्'' (तैत्ति.उप.२।१) इत्यत्र यत् सायुज्यं मुख्यतया निरूपितं तत् कामनायां सत्यां कृष्णएव सेव्यः. 'कृष्ण'पदेन च बहिर्भजनमेव मुख्यम् इति निरूपितम्.''यो वेद निहितं गुहायाम्'' (तैत्ति.उप.२।१) इति तु ज्ञानमार्गे।।१३।।

अब प्रमेयके सम्बन्धमें अवान्तर अर्थात् साधन तथा फल को निर्णय करिवेके अर्थ भक्तिमार्गरूप साधनमें वैशिष्ट्य अर्थात् भजनीयके स्वरूपके अनुसार फलमें तारतम्य होयवेको प्रतिपादन करत हें.

श्लोकार्थ : भगवान्के कोई भी रूपको भजन करिवेसुं फलकी सिद्धि होय हे तथापि सायुज्यरूप फलकी कामना जाकु होय वाकु तो आदिमूर्ति श्रीकृष्णकी ही सेवा करनी चहिये. एकादशस्कन्धमें मनुष्यन्के कल्याण करिवे वारे तीन मार्ग भगवान्नें उद्धवजी प्रति कहे हें:१.कर्ममार्ग २.ज्ञानमार्ग ३.भक्तिमार्ग. तहां कर्ममार्ग तो ज्ञानमार्गको सहायक हे. कल्याणके करिवे वारे तो दोई मार्ग हें : १.ज्ञानमार्ग तथा २.भक्तिमार्ग. तहां ज्ञानमार्गमें तो सब पदार्थ ब्रह्मरूप हें तासों कोई रूपकी ब्रह्म मानके उपासना करी जाय तो ब्रह्मभावरूप फल मिल जावे हे. ताहीसों वेदमें ''अन्नं ब्रह्मेत्युपासीत'' ''मनो ब्रह्मेत्युपासीत'' इत्यादि श्रुतिन्में अन्न, मन आदिकन्की भी ब्रह्मरूप मानिकें उपासना लिखी हे. भक्तिमार्गमें तो जेसे अपनी क्रीडाके अर्थ भगवान्नें जगत् बनायो हे तेसें ही जीवन्कुं अपनी प्राप्ति करायवेके अर्थ भक्तिमार्ग प्रकट कीयो हे. या मार्गमें अन्य देवता श्रीकृष्णकी विभूतिरूप हें. कामनावारेन्कों ओर-ओर फलन्कुं दे हें ओर निष्काम होयके यदि विभूतिरूप देवतान्की भक्ति करी जाय तो कालान्तरमें पुरुषोत्तममें भक्ति होय हे ये बात ब्रह्मपुराणके अन्तमें मायानुकीर्तनाध्यायमें लिखी हे. अन्य देवतान्की भक्ति करिवेसों यज्ञमें भक्ति होय हे. बहोत यज्ञादिक करिवेसों अग्नि प्रसन्न होय हे तब सूर्यमें भक्ति होय हे. सूर्य जब प्रसन्न होय हे तब शिवमें भक्ति होवे हे. शिव जब प्रसन्न होवे हें तब केशव भगवान्में भक्ति होवे हे. केशव भगवान् जब प्रसन्न होवें हें तब पूर्णफलकी प्राप्ति होवे हे. पूर्ण फलदानको सामर्थ्य तो मूलरूपमें ही हे. गीताजीके ''अतोऽस्मि लोके वेदे च प्रथितः'' या श्लोकमें, भागवतके ''कृष्णस्तु भगवान् स्वयम्'' या श्लोकमें ओर वेदमें गोपालतापनी उपनीषद्में श्रीकृष्णकी ही मूलरूपता लिखी हे. तथा ब्रह्मवैवर्तके ब्रह्मखण्डके द्वितीयाध्यायमें गोलोककी नित्यता लिखी हे. गोलोकमें योगिन्के ध्यानमें जो ज्योतिरूप आवे हे ताको वर्णन हे. योगिन्कुं आपको स्वरूप ज्योतिरूप ही भासमान होवे हे. वा ज्योतिमें प्रकृतिसों पर नित्य निर्गुण

आपको मेघश्याम स्वरूप विराजे हे. वो स्वरूप द्विभुज हे. कोटिकन्दर्प जेसो लावण्यवारो हे. वाही स्वरूप सों ब्रह्मा, विष्णु, सावित्रि, शिव, धर्म, सरस्वती, दुर्गा आदिकन्की उत्पत्ति लिखी हे–इत्यादि अनेक प्रमाण हें. या विषयको पण्डितकरभिन्दिपाल तथा प्रहस्त वादमें विस्तारसों वर्णन हे. मुख्य सायुज्यरूप फलकुं भगवान् ही देवे हें तासों सायुज्यके अर्थ आदिमूर्ति श्रीकृष्णहीकी सेवा करनी चहिये. मूल कारिकामें आये भये 'कृष्ण'पदसुं ये प्रतिपादित होत हे के भक्तिमार्गमें कृष्णको बहिर्भजन ही मुख्य हे. तैत्तिरीयश्रुतिके ''जो गुहामें स्थित परमतत्वकु जाने हे'' इत्यादि वाक्यमें हृदयमें ब्रह्मको दर्शन अथवा अनुभव करिवेको जो प्रतिपादन भयो हे वो ज्ञानमार्गकी दृष्टिसुं समझनो.

ननु सर्वत्रैव तत्तद्देवतासायुज्यं फलत्वेन श्रूयते. ततो विशेषः कः? इति चेत् तत्र आह निर्गुणा मुक्तिरस्माद्धि इति.

निर्गुणा मुक्तिरस्माद्धि सगुणा साऽन्यसेवया।।

सायुज्यं मुक्तिः. निर्गुणे सायुज्ये निर्गुणा भवति, सगुणे सगुणा. भगवद्व्यतिरिक्ताः सर्वएव कालपर्यन्तं सगुणाः. कालोऽपि गुणानुरोधीति सगुणप्रायः. अक्षरस्य प्रकारस्तु वक्तव्यः. ''मन्निष्ठं निर्गुणं स्मृतम्'' (भाग.पुरा.११।२५।।२४) इति ''तं भजन् निर्गुणो भवेद्'' (भाग.पुरा.१०।८८।५) इति वाक्यात् कृष्णसायुज्यमेव निर्गुणा मुक्तिः.

श्रुतिमें विभिन्न देवतान्की उपासनासों उन-उन देवतान्में सायुज्यरूप फलकी प्राप्ति होयवेकी बात लिखि हे. तब कृष्णसेवासों सायुज्य प्राप्त करिवेमें पूर्वोक्त उपासनान्सों प्राप्त होयवेवारे सायुज्यकी अपेक्षा कहा वैशिष्ट्य हे जाके कारण कृष्णकी ही उपासना करनी चहिये, अन्य देवतान्की नहीं? या प्रश्नको उत्तर आगेके श्लोकसुं देत हें.

श्लोकार्थःकृष्णकी सेवा करिवेसों निर्गुण मुक्तिकी प्राप्ति होवे हे ओर कृष्णसुं भिन्न अन्य देवतान्की सेवा करिवेसों सगुण मुक्ति प्राप्त होवे हे.

सायुज्यको स्वरूप श्रुतिमें लिख्यो हे. यजुर्वेद ब्रह्मवल्लीमें ''सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता'' इति. अर्थःकृष्णसेवा करिवे वारो जो भक्त हे सो परब्रह्म श्रीकृष्णके साथ सर्व कामन्को भोग करे हे. बाहिर प्रकट भये जो श्रीकृष्णचन्द्र हें उनहीकी सेवासों सायुज्यफलकी प्राप्ति होय हे. अन्य देवतान्की उपासनासों भी उन देवतान्के साथ सायुज्य मुक्ति होय हे. वो सायुज्य मुक्ति, परन्तु, सगुणमुक्ति हे. क्योंके कालादि सब देवता सगुण हें परि श्रीकृष्णचन्द्र तो निर्गुण हें. श्रीकृष्णचन्द्रको ज्ञान भी निर्गुण हे तथा श्रीकृष्णचन्द्रके भजन करिवे वारो भी निर्गुण हो जावे हे हे बात एकादशस्कन्धमें लिखी हे ''मन्निष्ठं निर्गुण स्मृतम्'' अर्थःभगवन्निष्ठ ज्ञान निर्गुण कह्यो गयो हे. तथा दशमस्कन्धमें ''तं भजन् निर्गुणो भवेत्'' अर्थःश्रीकृष्णको भजन् करिवेसुं भक्त निर्गुण होय जावे हे.

अक्षर-ज्ञानमार्गयोः एकत्वाद् द्वयम् एकेन समाहृतम्.

ज्ञानेऽपि सात्विकी मुक्तिः जीवन्मुक्तिरथापि वा।।

ज्ञानेऽपि सात्त्विकी मुक्तिः इति. ज्ञानमार्गः सगुणएव, ''सत्वात् सञ्जायते ज्ञानम्'' (भग.गीता१४।१७) इति वाक्यात्. अतएव ज्ञानिनो भीताः संसाराद् विरक्ता भवन्ति.

एवं ज्ञानमार्गे प्रवृत्तस्य सगुणत्वम् उपपाद्य ज्ञानसम्पत्तियुक्तस्य न सगुणत्वम् इति आशङ्क्य आह जीवन्मुक्तिरथापि वा इति. वा इति अनादरे. मुख्यपक्षे तु ''समासेनैव कौन्तेय'' (भग.गीता१८।५०) इति वाक्यसन्दर्भे ब्रह्मभावानन्तरं भक्तिः भवतीति गुणातीतएव प्रवेशः, ''ते प्राप्नुवन्ति मामेव'' (भग.गीता१२।४) इति वाक्यात्. तदभावे केवलं जीवन्मुक्ता भवन्तीति सनकादितुल्याः सगुणैव. इममेव विशेषं वक्तुं भगवन् आह ''सर्वभूतहिते रताः''

(भग.गीता१२।४) इति. अतएव शुकादीनां भक्तिमार्गोपदेशनद्वारा सर्वभूतहिताचरणम्. यस्तु ज्ञानमार्गे प्रवृत्तः प्राप्तज्ञानः कृष्णसेवार्थं यतते, तन्निष्ठां परित्यज्य, स महान् इति आह ज्ञानी चेद् भजते कृष्णम् इति.

ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः परः।।१४।।

यद्यपि ज्ञानमार्गेऽपि विषयो निर्गुणः तथापि मार्गः सगुणः इति भक्तिमार्गस्य उत्कर्षः. क्रियाशक्तेः इन्द्रियाणाञ्च वैफल्यं ज्ञानमार्गे. तस्माद् भक्तिमार्गानुसारेण कृष्णएव सर्वेषां सेव्यः इति निरूपितम्।।१४।।

अक्षरब्रह्म यद्यपि निर्गुण हे तथापि ज्ञानसों जेसें सात्विकी मुक्ति होय हे एसें अक्षरब्रह्मोपासनासों भी सात्विकी मुक्ति होय हे. क्योंके ''सत्वात् सञ्जायते ज्ञानम्'' या वाक्यमें सतोगुणसों ज्ञान्की उत्पत्ति लिखी हे. तासों ज्ञान सगुण हे. ज्ञानसों सगुण मुक्ति ही होवे हे तामें प्रमाण श्रीभागवतमें ''कैवल्यं सात्विकं ज्ञानम्'' अर्थःसात्विक ज्ञान ही मोक्ष हे. ''त्रैगुण्यविषया वेदाः'' अर्थःवेदोक्तज्ञानभी सगुण हे. तासों वेदके लिखे ज्ञानसों भी सगुणमुक्ति होवे हे. तासों ज्ञानमार्गमें ज्ञानद्वारा जीव कदाचित् जीवन्मुक्त होय तो भी सगुण ही रहे हे, जेसें सनकादिक. यदि ये निर्गुण होते तो जय-विजयकुं शाप नहीं देते. ज्ञानद्वारा ब्रह्मभाव जिनकों सिद्ध भयो होय ता पीछें कृष्णकी जब भक्ति होय तब निर्गुण होय हे, जेसें शुकदेवजी. शुकदेवजी निर्गुण जीवन्मुक्त हें

ताहीसों सब जीवन्के हितकारी हें. गीताजीमें ''ते प्राप्नुवन्ति मामेव सर्वभूतहितेरताः'' या श्लोकमें सर्वभूतहितकारी ज्ञानी भक्त मोकुं प्राप्त होय हे ये लिखी हे. तासों पहले ज्ञनमार्गकी रीतिसों ब्रह्मज्ञानी होयके पीछे ज्ञाननिष्ठा छोडके परब्रह्म श्रीकृष्णकी भक्ति करे हे. हस्त-पादादि कर्मेन्द्रियन्कों तथा नेत्र-श्रवणादि ज्ञानेन्द्रियन्कों प्रभुसेवा करिकें जो सफल करे हे वो ज्ञानीभक्त सर्व ज्ञानीन्में श्रेष्ठ हे. तासों ज्ञानमार्गमेंभी ज्ञानीकों भक्तिद्वारा ही निर्गुणकी प्राप्ति होय हे. ज्ञानमार्ग पहले सगुण हे ओर भक्तिमार्ग तो प्रथमहीसों निर्गुण हे तासों भक्तिमार्गको उत्कर्ष जानिके भक्तिमार्गकी रीतिसों कृष्णकी ही सेवा सबन्कुं करनी चहिये।।१४।।

ननु एवं सति कथं न सर्वे सेवन्ते इति आशङ्कायाम् आह बुद्धावतारे इति.

बुद्धावतारे त्वधुना हरौ तद्वशगाः सुराः।।
नानामतानि विप्रेषु भूत्वा कुर्वन्ति मोहनम्।।

'तु'शब्दः शङ्कां वारयति. कलिकालः स्वभावतः सर्वोत्कृष्टः. स्वल्पसाधनेऽपि महाफलप्रदः. अतो दैत्यव्यामोहार्थं भगवान् बुद्धो अवतीर्णः, सर्वप्रमाणमूलभूतं वेदं दूषितवान्. ततः पुराणादिमार्गदूषणार्थं तद्वशगाः सुराअपि तथा अनिषिद्धवेषम् आश्रित्य ब्राह्मणानां बुद्धिनाशार्थं तेष्वेव अवतीर्य मोहनार्थं नानामतानि कुर्वन्ति, काणाद-न्याय-मायावादादिरूपाणि. वाक्पेशलत्वात् मोहनरूपत्वम्।।

शङ्का : जो कृष्णसेवा ही सर्वोत्तम हे तो सब ही मनुष्य कृष्णसेवा क्यों नहीं करे हें? ताको उत्तर ''बुद्धावतारे'' या श्लोकमें लिखे हें.

गीताजीमें दैवजीव तथा आसुरजीव दोय प्रकरके जीव लिखे हें. जब आसुर जीव अर्थात् दैत्यलोग श्रेष्ठमार्गमें प्रवृत्त होयवे लगे तब उनकुं मोह करायवेके अर्थ भगवान्नें बुद्धावतार धारणा कियो तथा धर्मके मूल जो वेद हें तिनकी निन्दा करी एवं देवतान्कुं भी आज्ञा दीनी जो तुम भी पुराणन्की निन्दा करिके दैत्यन्कुं मोह करावो. तब देवतान्नें भी भगवान्की प्रेरणाके आधीन होयकें, ऋषिन्के कुलमें जन्म लेकें, निन्द्यवेष धारण करिकें वैशेषिक, न्याय, मायावाद, चार्वाक, निरीश्वर साङ्खच आदि खोटे शास्त्र बनाये. इन शास्त्रन्में एसी बातें लिखी हें के जिनके सुनिवे-पढिवेसों जीवकी बुद्धि बिगड़ जाय तथा उनके ही मतमें लग जावें.

ननु तेषां शास्त्राणां मुक्तिः फलं तथैव तत्र-तत्र प्रतीयते तत्कथं मोहनफलम्? इति चेत्, तत्र आह यथाकथञ्चिद् इति.

यथाकथञ्चित् कृष्णस्य भजनं वारयन्ति हि।।१५।।

वैदिके मार्गे जागरूके पौराणिके च तेनैव मार्गेण स्वयम् ऋषित्वं देवत्वं च प्राप्ताः किमिति अन्यथा वेदविरोधेन शास्त्रम् अवादिषुः यदि मुक्तिरेव सम्पाद्या स्यात् अतः सिद्धे राजमार्गेऽपि पुनः स्वयम् अतिक्लेशेन यत् शास्त्राणि कृतवन्तः अतो ज्ञायते मोहार्थमेव शास्त्रकरणम्. नापि तथाकरणे भगवतो विसम्मतिः, भगवतैव तथा ज्ञापनात्. ''त्वञ्च रुद्र महाबाहो मोहशास्त्राणि कारय, अतथ्यानि वितथ्यानि दर्शयस्व महाभुज, प्रकाशं कुरु चात्मानम् अप्रकाशञ्च मां कुरु'' इति वाराहवचनं ब्रह्माण्डोक्तं तथापरम् ''अमोहाय गुणा विष्णोरापारः चिच्छरीरता, निर्दोषत्वं तारतम्यं मुक्तानामपि चोच्यते, एतद्विरुद्धं यत्सर्वं तन्मोहायेति निश्चयः''. उक्तं पद्मपुराणे च शैवएव शिवेन तु, यदुक्तं हरिणा पश्चाद् उमायै प्राह तद्वरः. ''त्वामाराध्य तथा शम्भो ग्रहीष्यामि वरं सदा, द्वापरादौ युगे भूत्वा कलया मानुषादिषु, स्वागमैः कल्पितैस्त्वञ्च जनान्मद्विमुखान् कुरु, माञ्च गोपय येन स्यात् सृष्टिरेषोत्तरोत्तरा'' (पद्मपुरा.६।७२।१०६-१०७). एतदभिसन्धाय आह यथाकथञ्चित् कृष्णस्य इति. ते हि अलौकिकद्रष्टारः ''एवं मायावादाद्यनुसारेण शास्त्रे कृते लोका भगवद्बहिर्मुखा भविष्यन्ति''इति तथा कृतवन्तः इतिअर्थः।।१५।।

शङ्का : न्याय, मायावाद आदि शास्त्र यदि जीवन्कुं धोखा देवेकुं ही बने हें तो उन शास्त्रन्में मोक्ष फलको क्यों वर्णन कियो हे?

समाधान : मोक्षफलके देवे वारे चारों वेद तथा अष्टादश पुराण विद्यमान हें ही फिर उनकुं छोडके अपनी बुद्धिके अनुसार नये-नये मोक्षसाधन उन शास्त्रन्में बताये हें तासों मालूम होय हे के वे शास्त्र अवश्य जीवकुं मोह करायवेवारे हें. प्रथम मोहक शास्त्र बनायवेकी आज्ञा शिवजीके प्रति भगवाननें करी हे. हे बात वाराहपुराणमें रुद्रगीतामें लीखी हे. वहांको श्लोकः''त्वञ्च रुद्र महाबाहो मोहशास्त्राणि कारय''. अर्थःहे रुद्र तुम मोहक शास्त्र बनावो. तथा पद्मपुराणमें लिख्यो हे ''स्वागमैः कल्पितैस्त्वञ्च जनान् मद्विमुखान् कुरु''. अर्थःभगवान् आज्ञा करे हें हे रुद्र तुम अपने बनाये शास्त्रन्के द्वारा मनुष्यन्कुं मोसों विमुख करो. तब शिवजीनें भगवान्की आज्ञा मानिके मोहक शास्त्र बनाये, तथा अपनी शक्तिसों ऋषिन्की बुद्धि बिगाड़के ऋषिन्के द्वारा भी मोहक शास्त्र बनवाये. ताको प्रमाण पद्मपुराणके उत्तरखण्डमें लिख्यो हे. वहांके श्लोकः''मच्छक्त्या वेशितैर्विप्रैः सम्प्रोक्तानि ततः परम्'' इत्यादि श्लोक पुरुषोत्तमजी कृत श्लोक १६ की व्याख्यामें लिखे हें. यासों हे निश्चय भयो के उन् अलौकिक दृष्टा ऋषिलोगन्नें मायावादादिकन्के अनुसरण करिवेवारे भ्रामक शास्त्र बनाय जासुं उन भ्रामक वादन्को अनुसरण करिके लोग भगवद्बहिर्मुख होय जांय तथा श्रीकृष्णकी सेवासों हटि जावें।।१५।।

ननु मुग्धाश्चेत् संसारेऽपि भ्रान्ताइव पशुपुत्रादिषु कथं न मुग्धा जायन्ते? तत्र आह अयमेव महामोह इति.

अयमेव महामोहो हीदमेव प्रतारणम्।।

यत् कृष्णं न भजेत् प्राज्ञः शास्त्राभ्यासपरः कृती।।।।

नहि अल्पार्थे तेषां प्रवृत्तिः. महामोहस्तु अयमेव यत् क्रियाज्ञानशक्तिसद्भावेऽपि कृष्णं न भजेत्. परप्रतारणञ्च एतदेव. यतः तं महान्तं मन्वाना अभजन्तं दृष्ट्वा स्वयमपि न भजन्ते. प्राज्ञः इति ज्ञानशक्तिप्राबल्यम्. शास्त्राभ्यासपरः इति मिथ्याज्ञानाभिनिवेशः, साधनसम्पत्तिः वा. कृती इति क्रियासामर्थ्यम्.

यहां शङ्का होय हे के यदि मोहक शास्त्रन्सुं लोग मोहमें परि गये होंय तो संसारी अन्य लोगन्की भांति पशु-पुत्रादिमें मोहित क्यों नाहिं होत हें? तहां मोहको स्वरूप बताते भये समाधान करत हें.

जो ये ही बड़ो मोह हे तथा ये ही बड़ी ठगाय हे जो ज्ञानवान् होयकें, शास्त्रकुं पढकें, सेवा करिवेकी सामर्थ्य पायकें हु श्रीकृष्णकी सेवा नाहीं करे हें. परप्रतारणा भी ये ही हे क्योंके लोग मोहक शास्त्रकारन्कुं महान् समुझत हें ओर जब देखत हें के ये महान् लोग भगवान्को भजन नाहिं करत हें तब स्वयं भी भगवद्भजनसों विमुख ह्वे जात हें.

एवं शास्त्रकरणाद् बहवो विमुखा जाता इति निरूप्य, तथापि भगवत्सेवकोक्तप्रकारेण प्रवृत्ताइति सत्फलमेव भविष्यति इति आशङ्क्य आह तेषां कर्मवशानां हि इति.

तेषां कर्मवशानां हि भवएव फलिष्यति।।१६।।

न हि शास्त्रकर्तारो बलात् कञ्चन प्रवर्तयन्ति, नापि ''महान्त एते'' इति कश्चित् तत्र प्रवर्तते किन्तु दुरदृष्टवशात् तदुक्ते अर्थे श्रद्धा जायते. अन्यथा सर्वसम्मतं वेदं परित्यज्य तत्र कथं प्रवृत्ताः स्युः? अतः प्रारब्धवाशादेव तत्र प्रवृत्ताः संसारमेव फलम् आभूतसम्प्लवं प्राप्स्यन्ति, ''सृष्टिरेषोत्तरोत्तरा'' (पद्मपुरा.६।२६३।१०७) इति वाक्यात्. भगवद्विरोधाचरणेतु नरकेऽपि पातः. भवः संसारो दुःखात्मकः फलिष्यति।।१६।।

उपर्युक्त प्रकारसुं मोहक शास्त्रन्की रचना भई तथा उनको अनुसरण करिवेसुं अनेक लोग भगवद्बहिर्मुख भये एसो निरूपण करिकें अब शङ्का करत हें जो मोहकशास्त्र बनायवे वारे भगवान्के सेवक हें. भगवान्के सेवकन्के बताये भये मार्गानुसार प्रवृत्त होयवे वारेन्कुं सत्फलकी प्राप्ति क्यों नहीं होयगी? या शङ्काको समाधान तेषां कर्मवशानाम् श्लोकसुं करत हें.

यद्यपि मोहकशास्त्र बनायवेवारे ऋषिलोग मनुष्यन्कुं जबरदस्तीसों अपने-अपने बनाये शास्त्रन्में प्रवृत्त नहीं करे हें. लोग मोहकशास्त्र बनायवेवारेन्कुं महान् समुझके उनके द्वारा प्रतिपादित सिद्धान्तके पालनमें प्रवृत्त होवे हें एसो भी नहीं हे. वस्तुतः तो अपने अशुभ कर्मन्के फलरूप अदृष्टके कारण लोगन्की मोहकशास्त्रन्के रचयितान्के कथनमें श्रद्धा उत्पन्न होवे हे अन्यथा सर्वसम्मत वेदकुं छोड़िके लोग इन मोहक शास्त्रन्में कैसे प्रवृत्त होते यासुं स्पष्ट हे के मन्दभागी जीव अपुने मनसोंही खोटे शास्त्रमें प्रवृत्त हो जावे हें. वे जीव अपने कर्मानुसार सदा संसारचक्रमें ही भ्रमते रहे हें यदि उनको आचरण भगद्विरोधी न होय. भगद्विरोधी आचरण करिवे पर तो उनको नरकमें हु पात सम्भव हे ही।।१६।।

ननु तानि शास्त्राणि ज्ञानप्रतिपादकानि, क्वचित् कर्मप्रतिपादकानि चित्तशुद्ध्यर्थं, क्वचित् भक्तिप्रतिपादकानि च कथं मोहप्रतिपादकानि? इति आशङ्क्य आह ज्ञाननिष्ठा इति सार्द्धेन.

ज्ञाननिष्ठा तदा ज्ञेया सर्वज्ञो हि यदा भवेत्।।
कर्मनिष्ठा तदा ज्ञेया यदा चित्तं प्रसीदति।।
भक्तिनिष्ठा तदा ज्ञेया यदा कृष्णः प्रसीदति।।१७।।

समाधान करे हें ''नानावादानुरोधि तत्''. अर्थ:एक-एक वाद हे सो ब्रह्मके एक-एक धर्मको प्रतिपादन करिवे वारो जो एक-एक वाक्य उनके शेष-अङ्गभूत हे. भगवान् सब धर्मन्को अनुसरण करे हें. जेसे कितनेक नास्तिकादिक ईश्वरकुं नहीं माने हें. तथा कितनेक शून्य माने हें. कितनेक तुच्छ माने हें. कितनें ईश्वरको अभाव माने हें. कितनेक वादी नाश्य माने हें. कितनेक अद्रश्य अर्थात् ज्ञानमें तथा द्रष्टिमें नहीं आय सके एसो माने हें. परमेश्वरमें, परन्तु, ये सब बातें घट जावे हें. ताहीसों महोपनिषद्में ''एष ह्येव शून्य, एष ह्येवाव्यक्तोऽद्रश्योऽचिन्त्यो निर्गुणश्च'' एसे कह्यो हे. अर्थ:ये ईश्वर ही शून्य हे, ये ईश्वर ही अभाव हे, ये ईश्वर ही तुच्छ हे, ये ईश्वर ही अद्रश्य हे. याही रीतिके शब्द नास्तिकादिकन्के मुखसों निकसें हें, परन्तु इन शब्दन्के उनके विचारे भये उलटे अर्थ तो परमात्माको स्पर्श भी नहीं कर सके हें. तथा वाणीरूपा सरस्वती तो ईश्वरमें सुलटी रीतिसों घट जावे हे. जेसे उपरके लिखे भये मन्त्रको अर्थ कूर्म पुराणमें लिख्यो हे. ''शमूनं कुरुते विष्णुर् अद्रश्यः सन् परं स्वयम्, तस्माच्छून्यामिति प्रोक्तः तोदनात्तुच्छमुच्यते, नैष भावयितुं शक्यः केनचित् पुरुषोत्तमः, अतोऽभावं वदन्त्येनं नश्यत्वान्नाश इत्यपि'' अर्थ:ईश्वरके सुखके आगें लोकको सुख बहुत ही कम हे तासों ईश्वरकों शून्य कहे हें. सबन्के हृदयमें गुप्त होयकें प्रेरणा करे हें तासों तुच्छ कहे हें. भगवान्कुं कोई उत्पन्न नहीं कर सके हे तासों अभाव कहे हें. काल-मृत्यु आपको भक्षण नहीं कर सके हे तासों नाश्य कहे हें. एसें ही दोष वारे पुरुष भगवान्कुं अद्रश्य अथवा शून्यरूप माने हें. उनके मतको भगवान् अद्रश्य शून्य अभावरूप होयके अनुसरण करे हें. अर्थात् उनकुं भगवान् अपने स्वरूपको ज्ञान नहीं करावे हें. तसों उनके अर्थ अद्रश्य शून्य अभाव रूपही रहे हें. जे पुरुष भगवान्कुं पूर्णज्ञानक्रियावान् सर्वेश्वर सच्चिदानन्दरूप माने हें उनकुं ''रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति'' इत्यादि श्रुत्यनुसार रसरूप स्वरूपको अनुभव करायकें अनन्त आनन्द दे हें. या प्रकार नानावादके अनुरोधि हें अर्थात् अनेक प्रकारके वादी-विवादीके वाक्य भगवान्में घट जावे हें।।७०।।

तत्र ब्रह्मणि विरुद्धधर्माः सन्ति इति ज्ञापनार्थम् आह अनन्तमूर्तिइति.

अनन्तमूर्ति तद्ब्रह्म कूटस्थं चलमेव च।।
विरुद्धसर्वधर्माणाम् आश्रयं युक्त्यगोचरम्।।७१।।

अनन्ता मूर्तयो यस्य. ब्रह्म एकं व्यापकञ्च, तेन अनेकत्वम् एकत्वञ्च निरूपितम्. एवं गुणविरोधम् उक्त्वा क्रियाविरोधम् आह कूटस्थं चलमेव च इति. 'एव'कारः सगुणादिभेदविज्ञापनार्थः. 'च'कारो अनुक्तधर्मसङ्ग्रहार्थः. वाक्येष्विव अत्रापि स्वरूपे विरोधम् आशङ्क्य समाधानार्थं स्पष्टम् आह विरुद्ध सर्वधर्माणाम् इति. ब्रह्मैव हि सर्वाधारम्, यथा भूमिः सहजविरुद्धानामपि मूषकादिजीवानाम्. कारणगतएव धर्मः पृथिव्यां भासते. विशेषेण लौकिकयुक्तिः अत्र नास्ति, तदगम्यत्वाद् इति आह युक्त्यगोचरम् इति।।७१।।

शङ्का : भगवान् यदि विद्यमान हें तो आपको अभाव अथवा शून्यरूप केसे हो सके हे? सर्वदा विद्यमान वस्तुको अभाव तो नहीं होय सके हे

समाधान : भगवान्में लोकसों विरुद्ध धर्म हें. लोकमें भावरूप घटादिक अभावरूप नहीं होय सके हें. भगवान् तो ''यदस्ति यन्नास्ति च विप्रवर्य'' इत्यादि वाक्यन्के अनुसार अस्ति-भावरूप भी हें तथा नास्ति-अभावरूप भी हें. ''यदेकमव्यक्तमनन्तरूपम्'' अर्थ:ब्रह्म एक हे, व्यापक हे, अनन्तमूर्ति वारो हे. लोकमें जो एक होय सो अनेक नहीं होय हे. भगवान् एक हें तथा अनेक भी हें या प्रकार लोकविरुद्ध गुण दिखायकें लोकविरुद्ध क्रिया दिखावें हें. ''तदेजति तन्नेजति'' या श्रुतिके अनुसार भगवान् कूटस्थ हें, अर्थात् अचल हें तथा चल भी हें. याही प्रकारसों गुणादिभेद भी भगवान्में सम्भव हो सके हें. एसे अन्य भी वेदोक्त अनेक विरुद्धधर्म भगवान्मे हें यहां, परन्तु, विस्तारभयसों वर्णन नहीं करे हें.

परस्पर विरुद्ध धर्म एक पदार्थमें केसे रह सके हें? एसी शङ्का नहीं करनी. क्योंके ब्रह्म ही सब पदार्थन्को आधार हे. जेसे भूमि सहज विरोध राखिवे वारे सांप-मूषा, नाहर-बकरी आदि अनेक जीवन्को आधार हे. ओर जेसे बुद्धि परस्पर विरुद्ध जाग्रत् तथा स्वप्न अवस्था आदि वृत्तिको आधार हे वेसें ही ब्रह्म सर्व पदार्थन्को आधार हे. तथा पृथ्वी आदि पदार्थन्में भी

भगवान्‌की ही विरुद्धधर्माश्रयता भासमान होवे हे. विशेष करिके ब्रह्ममें लौकिक युक्तिकी पहोंच नहीं हे. जेसें वेदमें हजारन् मस्तक-कर-चरणारविन्द वारे भगवान्‌कुं बताये हें ये बात लौकिक युक्ति करिके गम्य नहीं हे. परन्तु वेदोक्त हे तासों अवश्य मानी जावे हे. एसेंही वेदोक्त विरुद्ध धर्माश्रयता भी मानी जावे हे।।७१।।

ननु अवतारेषु भगवत्त्वश्रुतेः लौकिकप्रमाणविषयत्ववत् लौकिकविषयत्वमपि कुतो न? इति आशङ्क्य आह आविर्भावतिरोभावैः इति.

आविर्भावतिरोभावैर् मोहनं बहुरूपतः।।

इन्द्रियाणान्तु सामर्थ्याद् अदृश्यं स्वेच्छयातु तत्।।७२।।

आविर्भावः अवतारो, मत्स्यादिरूपेण प्राकट्यम्. तिरोभावः अवतारसमाप्तिः. ते च बहुप्रकाराः स्थावरेभ्यो जङ्गमेभ्यः स्वतोऽपि भवन्ति. ते सर्वे प्रकारा मोहकाएव, नटवद् बहुरूपत्वात्. अन्यथा लौकिकयुक्तेः लङ्घनं न स्यात्. न हि मत्स्यो अह्ना योजनशतं वर्धते, नापि क्षणेन पर्वताकारो भवति वराहः. अतो लौकिकबुद्धिविषयत्वं नटइव ध्वान्तम्. स्वतो न लौकिकयुक्तिगोचरत्वम् इति अर्थः. तथापि कृष्णादयः सर्वैः दृष्टाअपि तेषु कथं लौकिकप्रमाणाविषयत्वम्? तत्र आह इन्द्रियाणां तु सामर्थ्याद् इति. चक्षुः न स्वसामर्थ्येन भगवन्तं विषयीकरोति, किन्तु भगवदिच्छयैव ''मां सर्वे पश्यन्तु'' इति एतद्रूपया तद् दृश्यम्।।७२।।

शङ्का : अवतारन्‌में भगवान् मनुष्यन्‌की लौकिक बुध्येन्द्रियादिन्‌सों अनुभूत होय हें एसेही लौकिक युक्तिन्‌सों भी भगवान् जानिवेमें आने चहियें.

उत्तर : लौकिक बुद्धि तथा लौकिक इन्द्रियन् करिके भगवान् ग्रहण करिवेमें आ जाय हें ये भ्रममात्र हे. जेसे नट अनेक रूप दिखावे हे तथा देखवे वारेन्‌कुं नाहर, हाथी, राजा के होयवेको भ्रम होय जावे हे एसे ही राम-कृष्णादि अवतारन्‌कुं भी साधारण मनुष्य समुझवेको भ्रम हो जाय हे. तथा मत्स्यावतार, वराहावतार आदिमें साधारण मच्छ तथा साधारण सूवर हे एसो मोह हो जावे हे. ओर जितने प्रकट होयवेके तथा अवतारकुं तिरोहित करिवेके प्रकार हें उनमें लौकिक युक्ति नहीं चल सके हे. जेसें थम्भासों प्रकट हो जानों, तथा हंसावतारमें स्वतः प्रकट हो जानों, मत्स्यावतारमें शीघ्र ही सरोवरके समान हो जानों, वाराहावतारमें क्षणमात्रमें पर्वताकार हो जानों आदि. तासों लौकिक प्रमाण तथा लौकिक युक्तिन्‌सों भगवान् नहीं जाने जांय हें.

यद्यपि लौकिक नेत्रादिकन्‌सों राम-कृष्णादि अवतारके दर्शन होवे हें तथापि लौकिक प्रमाण करिके गम्य भगवान् नहीं हें, क्योंकि नेत्र आदि इन्द्रियन्‌की भगवान्‌कुं देखिवेकी सामर्थ्य नहीं हे. भगवान्‌की जब सब जीवन्‌कुं अपनो स्वरूप दिखायवेकी इच्छा होवे हे तब ही नेत्र आदि इन्द्रियद्वारा आप दीखवेमें आवे हें, नेत्र आदि इन्द्रिय अपनी सामर्थ्यसों देवतान्‌कों भी नहीं देख सके हें तब अवतारन्‌को केसे देख सकेंगी।।७२।।

ननु ''रूपवद् द्रव्यं चाक्षुषम्'' इति महत्त्वाद् उद्भूतरूपत्वाच्च कुतो न चाक्षुषत्वम्? तत्र आह आनन्दरूपे इति.

आनन्दरूपे शुद्धस्य सत्वस्य फलनं यदा।।

तदा मरकतश्यामम् आविर्भावे प्रकाशते।।७३।।

आनन्दरूपे आनन्दएव ब्रह्मणि रूपस्थानीयः. तत्र शुद्धस्य सत्वस्य देवतारूपस्य भगवदिच्छया श्रीभगवदासनत्वेन स्फुरितस्य श्यामत्वात् तस्य प्रतिफलनेन् आनन्दो नीलमेघवद् भासते इति अर्थः, यथा स्फटिको जपाकुसुमेन. श्वेतपाषाणेषु प्रविष्टोऽपि स्फटिको जपाकुसुमलौहित्यं गृह्णन् पाषाणेभ्यो वैशिष्ट्यम् आत्मनः प्रतिपादयति, तथा ब्रह्मापि जगति पुराणेषु प्रकटीभवत् तच्छ्यामत्वादि गृह्णद् ब्रह्मत्वमपि ख्यापयति इति भावः. प्रतिफलनेन् आनन्दो नीलमेघवद् भासते इति अर्थः, यथा स्फटिको जपाकुसुमेन. श्वेतपाषाणेषु प्रविष्टोऽपि स्फटिको जपाकुसुमलौहित्यं गृह्णन् पाषाणेभ्यो

वैशिष्ट्यम् आत्मनः प्रतिपादयति, तथा ब्रह्मापि जगति पुराणेषु प्रकटीभवत् तच्छ्यामत्वादि गृह्णद् ब्रह्मत्वमपि ख्यापयति इति भावः. सत्वरजस्तमसां नील–रक्त–श्वेतरूपतेति गुणावतारवाक्यैः निर्णीयते।।७३।।

शङ्का : जो प्रकट रूप वारो पदार्थ होवे हे वाकुं नेत्र देख सके हे ये नियम हे. भगवान् यदि प्रकटरूप वारे हें तो नेत्रकरिकें अवश्य दीखने चहियें

उत्तर : जो लौकिक प्रकटरूप वालो पदार्थ होवे हे वाकुं नेत्र देख सके हे ये नियम हे. ब्रह्ममें तो लौकिक रूप नहीं हे तासों नेत्र नहीं देख सके हे. याहीसों कहीं–कहीं अरूप ब्रह्मको नाम हे, अर्थात् मायारचित रूप ब्रह्ममें नहीं हे. ब्रह्मके विषें तो आनन्द हे सोही रूपके स्थानमें समझनो. इच्छा करिकें आनन्दही रूपात्मक भासमान होवे हे. लौकिक रूप भगवान्में नहीं हे ताहीसों नेत्र आदि इन्द्रिय अपनी सामर्थ्यसों भगवान्कुं नहीं देख सके हें. तासों आसुर सब जीवन्कुं नेत्रन्की सामर्थ्य करिके अवतारादिकन्के जो दर्शन भये सो औपाधिक मायिक रूपके ही भये, आनन्दमय रूपके नहीं भये. आनन्दमय रूपके दर्शन उनही जीवन्कुं भये जिनकुं अनुग्रह पूर्वक इच्छा करिके करवाये. तहां साधारण जीवन्कुं जो दर्शन भये तामें द्रष्टान्त दे हें, जेसें श्वेत पाषाणके मध्यमें (जपाकुसम) लाल फूलके उपर स्वच्छ स्फटिकमणि धरी होवे हे तब देखवे वारेकुं स्फटिकमणिको स्वाभाविक रङ्ग तो नहीं दीखे हे, लाल रङ्गही मणिको दीखे हे, तथापि समीपके अन्य श्वेत पाषाणन्की अपेक्षा मणिमें चिलक अधिक दीखे हे, एसें ही साधारण जीवन्कुं अवतारको आनन्दमयरूप तो नहीं दीखे हे परि इच्छा करिकें भगवान्ने सत्वगुणके देवताकों आसन रूपसों ग्रहण करि राख्यो हे वाकी जो आनन्दमें झांई पडे हे तासों वो आनन्द नीलमेघके समान भासमान होवे हे. जेसें लाल फूल करिके स्फटिकमणि लाल मालुम पडवे लाग जावे हे तथापि अन्य पत्थरन् बीच चिलक अधिक रहे हे एसेंही भगवान् ब्रह्मा–विष्णु–शिवादि गुणावतारन्में मायाके सत्वगुण, रजोगुण तथा तमोगुण करिके श्याम–लाल–श्वेत रूपसों भासमान होवे हें, तथापि अन्य जीवन्की अपेक्षा उन रूपन्में ब्रह्मत्व प्रकट राखे हें. क्योंकि भगवान् जा पदार्थमें स्थित रहे हें वा पदार्थकु अपने भीतर स्थित करले हें. जेसें लोहके गोलामें स्थित होयके अग्नि लोहके गोलाकुं अपने भीतर स्थित करिके आपुन बाहिर प्रकट होय जावे हे. ये बात अन्तर्यामी ब्राह्मणमें लिखी हे. या प्रकार (मायिक) औपाधिक रूपमात्र नेत्रन्की सामर्थ्यसों दीख सके हे. भगवान्के दर्शन तो इच्छा आनन्द करिके ही हो सके हे. लौकिक नेत्रादि इन्द्रियन्की सामर्थ्यसों भगवान्को दर्शन नहीं होय सके हे. इतने विस्तार करिके ये बात सिद्ध भई के भगवान् इन्द्रियके गोचर नहीं हें. या प्रकार ही पृथ्वीमें नीलरूपतासों आपको अविर्भाव हे, जलमें प्राणमें श्वेतरूपतासों, तेजमें रक्तरूपतासों तथा वायुमें पीतरूपतासों आपको प्राकट्य समुझनो. युगावतारन्में भी याही रीतसों वर्णविभाग आगेके श्लोकमें दिखावे हें।।७३।।

उपपत्त्यन्तरम् आह चतुयुर्गेषु च तथा इति.

चतुर्युगेषु च तथा नानारूपवदेव तत्।।
उपाधिकालरूपं हि तादृशं प्रतिबिम्बते।।७४।।

''कृते शुक्लश्चतुर्बाहुः'' (भाग.पुरा.११।५।२१) इति वाक्याद्, अन्यथा नियतं रूपं न स्यात्. तत्रापि हेतुम् आह उपाधि इति. उपाधिकालः सत्यादिदेवतारूपः, तस्य रूपं ब्रह्मणि प्रतिबिम्बते. कालविशेषे रूपविशेषः तदाधारत्वेन ब्रह्मणि स्फुरितो ब्रह्मत्वं सम्पादयति इति अर्थः।।७४।।

सत्ययुगको अभिमानी देवता कालको जब भगवान्के आधार रूपसों स्फुरण होवे हे तब वाकी श्वेत झांईसों भगवान्को श्वेतरूप सत्ययुगमें भासमान होवे हे. याही प्रकार त्रेता–द्वापर–कलियुगके रक्त–पीत–श्याम देवतान्की झांई करिकें उन–उन युगन्में भगवान् रक्त–पीत–श्यामरूपसों भासमान होवे हें. ओर पहिले कहे अग्नि गोलाके द्रष्टान्तानुसार अपने आधारभूत कालाभिमानी देवतान्कुं आप अपने भीतर स्थित करिकें उनकुं भी अवतीर्ण ब्रह्मत्व सम्पादन करे हें. या रीतिसों प्रतिफलन करिके ब्रह्मत्व सिद्ध कियो. तथा नेत्रन्की सामर्थ्यसों जो भगवान्को रूप दीखवेमें आवे हे वाकी प्राकृतता सिद्ध करी.

अब भगवान्के आनन्दाकारमें मायिकपनेकी शङ्का दूर करिवेके अर्थ मुख्य सिद्धान्तके अनुसार ''आदित्यवर्णं तमसः परस्तात्'' ''शबलात् श्यामं प्रपद्ये'' (छान्दो.उप.८।१३।१) इत्यादि श्रुतिन्में लिख्यो भयो जो कृष्णको अप्राकृत अलौकिक रूप हे ताको वर्णन करे हें।।७४।।

एवं प्रतिफलत्वेन ब्रह्मत्वं प्राकृतरूपवत्वञ्च साधयित्वा प्रकारान्तरेण रूपवत्त्वं साधयति अथवा इति.

अथवा शून्यवद्गाढं व्योमवद् ब्रह्म तादृशम्।।
प्रकाशते लोकदृष्ट्या नान्यथा दृक् स्पृशेत्परम्।।७५।।

यथा मेघादिरहिते देशे आकाशे नीलिमा प्रतीयते. चक्षू रूपवद् द्रव्यं गृह्णत् तदभावे दूरं गतं सन् नीलमिव पश्यति, तथा अन्धकारम्. नैतावता आकाशे अन्धकारे वा रूपम् अस्ति. तथा ब्रह्माऽपि अतिगाढं गम्भीरतया नीलमिव भाति इति अर्थः. अनेन अचाक्षुषत्वं ज्ञापितं भवति. पूर्वापेक्षया अयं पक्षो महान् इति ज्ञापयितुम् आह नान्यथा दृक् स्पृशेत्परम्इति. ''पराञ्चि खानि'' (कठोप.२।१।१) इति श्रुतेः, परं चक्षुः न स्पृशति, अन्यथा परत्वमेव न स्याद् इति. यद्वा एवं नीलरूपत्वेन निराकारत्वं ब्रह्मणि आयातीति अरुच्या पक्षान्तरम् आह अथवा इति. उक्तव्याख्यानेऽपि तथा. एवं नीलिमभानोपपत्तावपि पीतवसनादिभानानुपपत्त्यपरिहाराद् अपसिद्धान्तत्वात् च व्याख्यानान्तरम् उच्यते. ब्रह्म तादृशम्, यादृशं दृश्यते तादृशमेव तद्वस्तु इति अर्थः. तत्र अनेकरूपत्वेन अब्रह्मत्वम् आशङ्क्य निरस्यति दृष्टान्तेन. गाढं घनीभूतं सैन्धवं लवणम् इति यावत्. तद् यथा अन्तर्बहिश्च एकरूपरसं तथा ब्रह्म अनेकरूपत्वेन भासमानमपि शुद्धमेव इति अर्थः. ''स यथा सैन्धवघन''(बृहदा.उप.४।५।१३) इत्यादि धर्मिग्राहिकमानात् तत् तादृगेव मन्तव्यम् इति भावः. तर्हि ''पराञ्चि खानि'' (कठोपनि.२।१।१) इति श्रुतेः दृग्विषयत्वानुपपत्तिः इति अतः आह ''शून्यवद् व्योमवद् लोक-दृष्ट्या ब्रह्म न प्रकाशते'' इति. शून्यगृहादौ वस्त्वभावादेव यथा न किञ्चिद् दृश्यं भवति तथा इति अर्थः. दर्शनं हि द्वेधा, तदर्थं प्राकट्येन साधारण्येच्छया वा. तत्र आद्याभाववत् स्वयं दृष्टान्तः, तेषाम् आसुरभावाद् यथोक्तब्रह्मानङ्गीकारात् तादृक् तान् प्रत्यसदेव इति भावः.

यद्वा. शून्यं तम उच्यते. तेन तद्वद् गृहादि लक्ष्यते. तत्र यथा सदपि वस्तु प्रकाशकाभावात् न भाति तथा इदम् अनुग्रहाभावात् तथा इति अर्थः. अनवतारदशायां तथेच्छाभावाद् व्योमवत् तथा इति अर्थः. रूपाभावाद् यथा तद् अयोग्यं तथा इदमपि इति भावः. इच्छा तत्र रूपस्थानीया ज्ञेया. दर्शने हेतुम् आह अन्यथा उक्तवैपरीत्येन तदनुग्रह-तदिच्छाभ्यां दृक् परं स्पृशेद् इति अर्थः. यद्वा. जलेन न शून्या अशून्याः सजलमेघाः इति यावत् तद्वद् व्योमवच्च श्यामं स्वरूपं लोकदृष्ट्या यत् प्रतीयते तद् ब्रह्म. नतु उपाधिः औपाधिकं वा इति अर्थः.

ननु अत्र उपपत्तिः का? इति अत आह तादृशम् इति. तद् वस्त्वेव तथा इति अर्थः. न हि वस्तुस्वरूपम् उपप-त्तिम् अपेक्षते इति भावः. उपपत्तिमपि आह अन्यथा यदि शुद्धं ब्रह्म न स्यात् तदा अदृग् न विद्यते, दृग् ज्ञानं यस्य स तथा पशु-पक्षि-वृक्षादिः परं प्रकृतिकालाद्यतीतं न स्पृशेत् न प्राप्नुयाद् इति अर्थः.

अथवा. अन्यथा शत्रुत्वेन ज्ञानं यस्य स पूतनादिः प्रकृत्याद्यतीतं न प्राप्नुयाद् इति अर्थः. अस्य तर्करूपत्वाद् आपादकं ''यदि ब्रह्म न स्याद्'' इति रूपम् अर्थादेव प्राप्यते इति न उक्तम्।।७५।।

''तस्य हैतस्य पुरुषस्य रूपं यथा महाराजानं यथा पाण्ड्वाविकं यथेन्द्र गोपो यथाग्न्यर्चिः'' इत्यादि श्रुतिन्में इन्द्रगोप, मणि, अग्निज्वाला आदि पदार्थन्के समान परब्रह्म श्रीकृष्णको रूप लिख्यो हे सो रूप मायारचित नहीं हे किन्तु ब्रह्मात्मक ही हे. ''यन् मायया मोहिताश्च श्रीकृष्णं निर्गुणं विना'' या ब्रह्मवैवर्त प्रकृतिखण्डके वाक्यमें भी अन्य देवतान्कुं ही प्रकृति लिखे हें. श्रीकृष्णको तो स्वरूप निर्गुण ही हे, परन्तु अत्यन्त गम्भीर तथा अनवगाह्य हे, अर्थात् जा स्वरूपको अन्त दृष्टि नहीं पाय सके एसो आपको स्वरूप हे. तासों लोकदृष्टि करिके नील जेसो मालुम पडे हे. वस्तुतः नीलगुण वारो आपको स्वरूप नहीं हे किन्तु वो वस्तु ही वेसी हे. निज सामर्थ्यसों ही नील भासमान होवे हे.

न्यायके चोबीस गुणन्में जो 'रूप'नामको गुण लिख्यो हे सो ब्रह्ममें नहीं हे. ब्रह्म 'रूप'गुण रहित हे तो भी गम्भीर हे. तासों अपने स्वभावसों ही नील भासमान होवे हे. यामें दृष्टान्त:जेसे अन्धकार तथा आकाश 'रूप'गुण रहित हें तो भी गम्भीर हें तासों अपनी सामर्थ्य करिके ही नील भासमान होवे हें. दृष्टितो रूपकुं ग्रहण करिवे वारी हे. आकाशमें तो रूप नहीं दीखे हे, तब दृष्टि अत्यन्त दूरी गई भई नील रूपकुं जेसो देखे हे तेसे आकाशकुं देखे हे. तासों आकाशमें रूप हे एसें नहीं जाननो किन्तु रूप रहित ही आकाश गम्भीरताके कारण नीलरूप जेसो भासमान होवे हे. एसे ही ब्रह्म गम्भीर हे तासों नीलरूप जेसो भासमान होवे हे. जब आप गम्भीरताकुं नहीं दिखावे हें तब आपको स्वरूप जेसो श्रुतिमें लिखे हें वेसो ही दर्शन्में आवे हे. जेसे ''बदरपाण्डुवदनो मृदुगण्डम्'' (भाग.पुरा.१०।३५।२४) या भागवतके श्लोकमें वर्णन हे. कृष्णचन्द्रके मुखारविन्दके दर्शन व्रजभक्तन्कुं बेरके समान पाण्डुवदन्के अर्थात् पीतगौर भये. इतने विस्तार करिके भगवान् प्राकृतरूप रहित हें तासों नेत्र अपनी सामर्थ्यसों भगवान्कुं नहीं देख सके हे ये प्रतिपादित कियो. नेत्र जेसें अन्य वस्तुन्कुं देख सके हे तेसें भगवान्कुं भी देख सकते होंय तो जेसें अन्य पदार्थ नेत्र आदि इन्द्रियन्सों पर नहीं हें तेसें भगवान् भी नेत्रादि इन्द्रियन्सों पर नहीं कहावेंगे तासों नेत्र अपनी सामर्थ्यसों भगवान्कुं नहीं देख सके हें ये सिद्ध भयो. याहीसों ''पराञ्चि खानि'' (कठोप.४।१) या श्रुतिमें उलटी इन्द्रियें ब्रह्मको स्पर्श नहीं कर सके हें ये बात लिखी हे. यासों यह शङ्का नहीं करनी के भगवान्में रूप इन्द्रिय कछु भी नहि हें. तब तो आप जा भक्तकुं दर्शन देनों चाहते होंयगे वाकु भी केसें दर्शन देते होंयगे, क्योंकि दर्शन देनो चाहे हें वाकुं तो हस्त चरणा-रविन्दादिक इन्द्रिय तथा रूपादिगुण सच्चिदानन्दात्मक ही दीखे हें.

याही श्लोककी श्रीगुसांईजीने करी भई व्याख्याको वर्णन करे हें. भगवान्को स्वरूप जेसो अनुग्रह वारे कृपापात्र भक्त देखे हें तेसो ही माननो चहिये. अनेक रूप होयवेसों ब्रह्मपनों नहीं मिटे हे, यामें दृष्टान्त देत हें. जेसो गाढो अर्थात् सघन सैन्धव-लवण बाहिर-भीतरसों एकरस रहे हे एसें ही अनेक रूप वारो ब्रह्म भी सदा एकरस तथा शुद्ध रहे हे.

''पराञ्चि खानि'' (कठोप.४।१) या श्रुतिसों ब्रह्म नहीं दीखे हे एसो तात्पर्य निकसे हे, तासों तो लोकदृष्टिसों नहीं दीखे हे ये बात समुझनी. वामें दृष्टान्त : जेसें सूने घरमें कोई पदार्थ नहीं दीखे हे, क्योंकि वहां दीखवे लायक कोई पदार्थ नहीं हे एसेंही लोकदृष्टि करिके दीखवे लायक पदार्थ लौकिकरूप हे तथा ब्रह्ममें लौकिक रूप नहीं हे तासों लोकदृष्टिसों शून्यके समान ब्रह्म प्रकाशमान नहीं होवे हे.

दर्शन होयवेके दो प्रकार हें. एक प्रकार तो ये हे के जाके अर्थ भगवान् प्रकट होंय वो दर्शन करि सके हे. दूसरो प्रकार ये हे के जिन जीवन्कुं अन्य मनुष्यन्के समान ही अपनो भी स्वरूप दिखायवेकी भगवान्की इच्छा होवे हे तब अन्य मनुष्य जेसें ही भगवान् भी दीखे हें. तथा जिनके अर्थ प्राकट्य नहीं हे एसे आसुरजीव शास्त्रोक्त ब्रह्मकुं असत् माने हें, अर्थात् झूठो माने हें, उनकुं भगवान् असत् जेसें ही दीखे हें. सूने घरमें कछु नहीं दीखे हे तेसें भगवान् प्रकाशमान नहीं होवे हें, क्योंकि ''मायेत्यसुरास्तं यथायथोपासते'' (मुद्गलोप.३।३) या मण्डल ब्राह्मणकी श्रुतिमें जो जेसी उपासना करे हे वाकुं वेसे ही भगवान् भासमान होवे हें एसे लिख्यो हे. अथवा 'शून्य'नाम अन्धकारको हे. जेसे अन्धकार वारे घरमें दिया विना धरी भई वस्तु भी नहीं दीखे हे एसें अनुग्रह विना अवतार समयमें विद्यमान भी भगवान् नहीं दीखे हें. जा समय अवतार नहीं होय वा समय तो स्वरूप प्रकट नहि हे तासों रूप रहित आकाश जेसें नहीं दीखे हे तेसें भगवान् भी नहीं दीखे हें. वहां इच्छाकुं ही रूपके ठिकानें समुझनो. जेसें रूप नहीं होय तो पदार्थ नहीं दीख सके हे तेसें इच्छा नहीं होय तो भगवान् नहीं दीख सके हें. अन्य लोगन्कों दृष्टि करिके ही जब आप अपनो रूप दिखानो चाहे हें तब भगवदनुग्रह भगवदिच्छा करिके लोकदृष्टि भी हरिको स्पर्श करे हे. जेसें महाभारतमें अश्वमेघपर्वमें उत्तङ्ककुं लोकदृष्टि करिके ही भगवान्ने दर्शन कराये. उद्योग पर्वमें कौरवन्कुं भी लोकदृष्टि करिके ही दर्शन कराये. या पक्षकुं हृदयमें राखिकें दूसरो अर्थ करे हें. जलसों भरे बादल जेसे श्याम तथा आकाश जेसो श्याम स्वरूप लोकदृष्टि करिके जो प्रतीत होवे हे वो ब्रह्म ही हे, औपाधिक अथवा मायिक नहीं हे, क्योंकि वो वस्तु ही वेसी हे. वस्तु स्वरूप युक्तिकी (उपपत्तिकी) अपेक्षा नहीं करे हे. श्रीकृष्ण यदि शुद्ध परब्रह्म न होते तो ज्ञान रहित पशु-पक्षी-

वृक्षादिकन्कुं प्रकृति–कालसों पर निज स्पकी प्राप्ति नहीं होती. अथवा आप यदि परब्रह्म न होते तो आपकुं अपने शत्रु जानिवे वारे पूतनादि दैत्य प्रकृति–कालातीत भगवान्के स्वस्पकुं नहीं प्राप्त होते.

इन कहे भये प्रकारन्को अपने–अपने अधिकारानुसार उपयोग हे. उत्तमाधिकारीकुं तो पुष्कल ज्ञान सिद्ध होयवेके अर्थ इन सर्वपक्षन्को ज्ञान होनों चाहिये. या प्रकार भगवान्में लौकिक दोषको परिहार कियो।।७५।।

एवं लौकिकत्वदोषं परिहृत्य कर्तृत्वेन वैषम्य–नैर्धृण्ये प्राप्ते परिहरति आत्मसृष्टेः इति.

आत्मसृष्टेर्न वैषम्यं नैर्धृण्यं चापि विद्यते।।
पक्षान्तरेऽपि कर्म स्यान्नियतं तत्पुनर्बृहत्।।७६।।

''स आत्मानं स्वयमकुरुत'' (तैत्ति.उप.२।७) इति श्रुतेः. जगति नानाविधान् सृजन्नपि न विषमो भवति. नापि क्रूरं कर्म कुर्वन् निर्धृणो भवति. चकाराद् अन्येऽपि दोषाः परिहियन्ते.

अत्र मतान्तरम् आशङ्क्य परिहरति पक्षान्तरेपि इति. ''वैषम्य–नैर्धृण्ये न सापेक्षत्वात्'' (ब्रह्मसूत्र२।१।३४) इति बादरायणः तत् कर्मसापेक्षत्वान् न विषमः इति आह. तथा सति कर्म नियतं नियामकं भवेत्. परं तत् कर्म किम्? इति विचारणीयम्. ब्रह्म चेत्, स दोषः तदवस्थः. अन्यश्चेद् ब्रह्मणः तत्सापेक्षत्वाद् असमर्थत्वम्. तद्धेतोरेव अस्तु इति न्यायेन कर्मणएव तत्समाधाने ईश्वरकारणता न सम्भवेत्, हेतुव्यपदेशश्च विरुद्ध्येत. नापि लोकवद् दूषणस्थापनं युक्तम्. अत आत्मसृष्टेः इत्येव हेतुः. सूत्रं तु लोकबुद्ध्यनुसारि. अन्यथा ''फलमत उपपत्तेः'' (ब्रह्मसूत्र३।२।२८) इति अधिक–रणं विरुद्ध्येत।।७६।।

अब भगवान् जगत्के कर्ता हें तो कोई जीवकुं हंस तथा कोई जीवकुं काक बनावे हें एसी विषमता क्यों होनी चहिये? तथा कोईकुं सुखी, कोईकुं दुःखी राखे हें एसो निर्दयपणों क्यों होनो चहिये? इन दोनों दोषन्को परिहार अगाड़ीके श्लोकमें करे हें.

सृष्टि ब्रह्मके स्वस्पसों ही होयवेसुं ब्रह्मकों सृष्टिकर्ता मानिवेमें ब्रह्ममें वैषम्य तथा नैर्घृण्य दोष आयवेकी सम्भावना नहीं हे. एक अन्य मत हे के व्यक्तिके सुख–दुःखके नियामक व्यक्तिके कर्म होय हें. वस्तुविचारसुं, किन्तु, ये कर्म भी ब्रह्म ही हे. ''स आत्मानं स्वयमकुरुत'' (बृहदा.उप.१।४।३) या श्रुतिके अनुसार भगवान् अपने आत्माकुं ही जगद्रूप करे हें. अर्थात् आप ही सर्वस्प होय रहे हें. तासों भगवान् उंची–नीची, गज–गर्दभ आदि अनेक जाति रचते भये भी विषम नहीं कहावे हें. तथा कोईकों सुखी कोईकों दुःखी करते भये भी निर्दय नहीं कहावे हें. क्योंकि लोकमें भी ओरकुं दुःख देवे वारो ही निर्दय कहावे हे, जो समर्थ पुरुष क्रीडाके अर्थ अपनी इच्छा करिके ही कभी राजा कभी कङ्गाल बन जावे तथा कभी सुखी कभी दुःखी बन जावे वाकुं कोई विषम वा निर्दय नहीं कहे हे. एसे ही अवतारन्में जो आसुर जीवन्कुं मोह करायवेके अर्थ युद्धसों भागनो, कहिं अज्ञान दिखा देनों, कहिं भक्तवश होयकें बन्धनमें आय जानों इत्यादि अनेक चरित्रन्कुं दूषणस्प नहीं समुझनो, किन्तु एसे चरित्र क्रीडाके भूषणस्प ही हें.

कितनेक मतवादी कर्मकुं ही सुख–दुःखको देवे वारो माने हें ईश्वरकों नहीं माने हें, उनसों ये पूछनो चहिये के कर्म तो जड पदार्थ हे, सुख–दुःख केसे दे सके हे? कर्मानुसार सुख–दुःख देवे वारो अन्य चेतन पदार्थ मान लेनो चाहिये.

कदाचित् कहोगे कर्मको नियम करिवे वारो अन्य कोई नहीं हे, पहिलेको कर्म ही कर्मको नियम करिवे वारो हे, अर्थात् पूर्व जन्मको सुकर्म या जन्ममें सुकर्ममें प्रवृत्ति करावे हे तथा पूर्व जन्मको कुकर्म या जन्ममें कुकर्ममें प्रवृत्ति करावे हे. ताको ये उत्तर हे के पूर्व कर्म करिकेहि कर्ममें प्रवृत्ति होय जाती होय तो वेदके विधिवाक्यन्को कर्ममें प्रवृत्ति करवानो वृथा हो जायगो, तासों उन वाक्यन्कुं सार्थ करिवेके अर्थ सुकर्ममें प्रवृत्ति करायवे वारे वाक्यन्के आधीन सुकर्मकुं माननो पडेगो तथा

कुकर्मको निषेध करिवे वारे वाक्यन्के आधीन कुकर्मकुं माननों पडेगो तब तो सबही मनुष्य वेदवाक्यन्कुं पढके अथवा सुनकें सब ही कुकर्मसुं निवृत्त हो जायेंगे तथा सुकर्ममें प्रवृत्त हो जायेंगे, अधर्म कोई भी नहीं करेंगे. तब तो नरक बनानों भी वृथा होयगो. अधर्मके प्रायश्चित्त बतायवे वारी स्मृतियें वृथा जांयगी, तथा लोककी अधर्ममें प्रवृत्ति होय रही हे सोभी नहीं होनी चाहिये. तासों धर्माधर्मके स्वरूप जानवेवारे मनुष्यकुं भी निज इच्छाके अनुसार पुण्य-पापमें प्रवृत्ति निवृत्ति करायवे वारो स्वतन्त्र कर्ता ईश्वर अवश्य माननो चहिये.

शङ्का : कितनेक मतवादी कहे हें के ईश्वरतो कर्मके अनुसार सुख-दुःख देत हे. यासों उनके मतमें ईश्वर कर्मके आधीन भयो, ईश्वर समर्थ नहीं भयो, तासों कर्मन्कुं ही सुख-दुःखके मुख्य हेतु-कारण माननों उचित हे.

समाधान : यदि ये मत उचित हे तब तो ''ईश्वर ही सुखदुःखको देवेवारो हे'' या रीतसों कहिवे वारी सब स्मृति व्यर्थ भई. जेसें गीताजीमें ''सुखं दुःखं भवो भावो भयं चाभयमेव च, भवन्ति भावा भूतानां मत्त एव पृथग्विधाः'' (भग.गीता१०।५) अर्थ : कृष्ण कहे हें प्राणिमात्रके सुख दुःख भय अभय मेरे करे भये होवे हें. तथा ''स एव साधु कर्म कारयति'' (कौषि.उप.३।८) या श्रुतिमें जा जीवकुं उपरके लोकमें लेजायवेकी इच्छा होवे हे वासों सुकर्म करवावे हें तथा जा जीवकुं नीचेके लोकमें लेजावेकी इच्छा होवे हे वासों कुकर्म करवावे हें ये लिखी हे ताको विरोध आयगो. तासों आत्मसृष्टिपक्ष माननों, लौकिक ईश्वर एसे राजादिकन्के समान सर्वेश्वर भगवान्में दोष नहीं लगावनो. ''वैषम्य-नैर्घृण्ये न सापेक्षत्वात्'' (ब्रह्मसूत्र२।१।३४) ये सूत्र तो लोकबुद्धिके अनुसार हे. जो या सूत्रको अर्थ वादीके मतके अनुसार मानोगे तो ''फलमतः'' (ब्रह्मसूत्र३।२।३८) या सूत्रमें भगवान् ही सुख-दुःखादि सब फलके दाता हें ये बात लिखी हे तासों विरोध आवेगो।।७६।।

ननु अस्तु सापेक्षएव कर्ता, सगुणत्वाद् इति आशङ्क्य आह स एव हि जगत्कर्ता इति.

स एव हि जगत्कर्ता तथापि सगुणो न हि।।
गुणाभिमानिनो ये हि तदंशाः सगुणाः स्मृताः।।
कर्ता स्वतन्त्रएव स्यात् सगुणत्वे विरुद्ध्यते।।७७।।

यस्तु उच्चावचं सृजति सएव जगत्कर्ता. नापि सगुणः. हेतु सिद्ध्यर्थं सगुणस्य लक्षणम् आह गुणाभिमानिनः इति. गुणैः कृत्वा अभिमानिनः. अनेन देहेन्द्रियाभिमानाभावेऽपि गुणाभिमानमात्रेणैव सगुणत्वम्. ते गुणाः सृष्ट्यादिहेतवः. अनधिष्ठिताः पुनः न कुर्वन्तीति गुणाधिष्ठात्र्यो देवताः ब्रह्मादयः सगुणाः उच्यन्ते. तेषां स्वातन्त्र्यम् आशङ्क्य आह तदंशा इति. तत्र प्रमाणं, स्मृता इति. स्मृति-पुराणेषु तथा प्रसिद्धेः इति अर्थः. भगवांस्तु सर्वात्मा सर्वनियन्तामूलकर्तेति न सगुणः.बाधकम् आह कर्तास्वतन्त्रएवस्याद् इति।।७७।।

शङ्का : सगुण हे तासों कर्मसापेक्ष ईश्वर ही कर्ता होवे हे. अभिप्राय ये हे के गुणाधीन होयवेसों जेसें ईश्वरताकी हानि नहीं हे तेसें कर्माधीन होयवेसों भी ईश्वरताकी हानि नहीं होवे हे.

श्लोकार्थ : वो शुद्ध ब्रह्म ही जगत्कर्ता हे. कर्ता होते भये भी वो सगुण नहीं हे. जिन गुणाभिमानी देवतान्कुं स्मृति-पुराणादिमें सगुण कहे हें वे शुद्ध ब्रह्मके अंश हें. कर्ता वो ही हो सके हे जो स्वतन्त्र होय. सगुणको कर्तृत्वसों विरोध हे, अतः ब्रह्मकु सगुण मान लेवेसुं वाकुं स्वतन्त्र नहीं कह्यो जा सकेगो फलतः वाकु कर्ता नहीं मान्यो जा सकेगो.

उत्तर : जो उच्चावच सृष्टिकों सृजें हे वो ही जगत्कर्ता हे, परन्तु सगुण नहीं हे. गुणन् करिके अभिमानी जे ब्रह्मादिक देवता हें वे ही सगुण कहावें हे. यद्यपि ''हम देहेन्द्रिय वारे हें'' एसो अभिमान ब्रह्मादिकन्कुं नहीं हे तथापि विना अधिष्ठाता देवताके सत्व-रजस्-तमोगुण स्वयं सृष्टिकार्य नहीं कर सकें हे तासों गुणके अभिमानी ब्रह्मादिक देवता हें, वे ही गुणन्के अधिष्ठाता

देवता हे, वे ही सगुण कहावे हें. वे सब देवता ब्रह्मके अंशरूप हें अतः परतन्त्र हें ये बात ''यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः''–''आदावभूच्छतधृती रजसास्य सर्गे विष्णुः'' इत्यादि पुराण–स्मृतिमें प्रसिद्ध हे।।७७।।

एवं स्वमतं स्थापयित्वा परमतनिराकरणाय भगवन्तं सगुणं मन्यमानान् उपहसति केचिदत्र इति.

केचिदत्रातिविमलप्रज्ञाः श्रौतार्थबाधनम्।।

कृत्वा जगत्कारणतां दूषयन्ति परे हरौ।।७८।।

अतिक्रान्ता विमला प्रज्ञा येभ्यः. तत्र हेतुम् आह श्रौतार्थबाधनम् इति. श्रुत्या अभिधया वृत्त्या यो अर्थः प्रतिपाद्यते प्रकरणानुरोधेन सएव श्रुत्यर्थः. तत्र ''सदेव सौम्येदमग्र आसीत्'' (छान्दो.उप.६।२।१) ''आत्मा वा इदमेवाग्र आसीत्'' (ऐत.उप.१।१) ''ब्रह्मविदाप्नोति परम्''(तैत्ति.उप.२।१) ''भृगुर्वै वारुणिः'' (तैत्ति.उप.३।१) इत्यादिब्रह्मप्रकरणेषु निःसन्दिग्धेषु, ब्रह्मणएव केवलस्य जगत्कारणत्वं प्रतिपादितम्. तत्सामान्याद् इतरेष्वपि सन्दिग्धेषु व्यासैः सूत्रेषु तथैव अर्थो निर्णीतः. तद् उभयं बाधित्वा वाक्याभासं युक्त्याभासञ्च पुरस्कृत्य ब्रह्मणो जगत्कारणतां दूषयन्ति. परे हरौ पुरुषोत्तमः परं ब्रह्म इति यावत्।।७८।।

भगवान् तो सर्वात्मा रूप हें तासों गुणरूप भी आप ही हें. सबके नियन्ता हें. मूलकर्ता हें तासों सगुण नहीं हें. भगवान् यदि सगुण होवें तो गुणाधीन होयवेसों स्वतन्त्र कर्तापनो जो श्रुतिपुराणन्में लिखो हें तासों विरोध आवेगो.

कितनेके अतिविमलबुद्धि वारे, अर्थात् निर्मलबुद्धि जिनको उल्लङ्घन कर गई हे एसे पुरुष पहिले ब्रह्मकुं जगत्को कारण मान करिके कारणताको खण्डन करें हे. शुद्ध ब्रह्म हि जगत्को कर्त्ता हे ये जो श्रुतिन्को मुख्य अर्थ हे ताकुं नहीं माने हें.

तहां छान्दोग्य उपनिषद्में ''सदेव सौम्येदमग्र आसीत्'' (छान्दो.उप.६।२।१) या श्रुतिमें जगत्की उत्पत्तिके पहिले अप्रकट स्वरूप केवल सद्रूप एक परब्रह्मको ही वर्णन करिके शुद्ध ब्रह्मसों ही तेज आदि पदार्थन्की उत्पत्ति कही हे तासों शुद्ध ब्रह्म ही जगत्को बीज हे ये सिद्ध होवे हे. ऐतरेय उपनिषद्में भी परमात्मासों ही जल आदि पदार्थन्के क्रमसों लोकपालादिकन्की सृष्टि कही हे. एसें ही तैत्तिरीय उपनिषद्में ब्रह्म सच्चिदानन्दरूप हे एसे लक्षण कहिकें ''तस्मादात्मन आकाशः सम्भूतः'' (तैत्ति.उप.२।१।१) वा ही शुद्ध सच्चिदानन्दस्वरूप परब्रह्मसों आकाश आदि सब जगत्की उत्पत्ति वर्णन करी हे. इन वाक्यन्में माया शबलित ब्रह्मसों जगत्की उत्पत्ति कहीं नहीं वर्णन करी हे. तासों व्यासजीने शुद्ध परब्रह्मकुं ही जगत्कारण कह्यो हे. तथा इन वाक्यन्के समान जिन वाक्यन्में आकाश प्राण आदिकन्सों सृष्टि वर्णन करी हे उन वाक्यन्में भी ''आकाशस्तल्लिङ्गात् अतएवप्राणः'' (ब्रह्मसूत्र१।१।२२) इत्यादि सूत्रन् करिके 'आकाश' 'प्राण' आदि शब्दन्कों ब्रह्मके वाचक कहि शुद्ध ब्रह्म ही जगत्को कारण हे ये सिद्धान्त जतायो।।७८।।

तर्हि किं कारणम्? इति आकाङ्क्षायाम् आह अनाद्यविद्यया इति.

अनाद्यविद्यया बद्धं ब्रह्म तत्किल कारणम्।।

अनादिः अविद्या ''अहम् अज्ञः'' इति अनुभवसिद्धा भावरूपा. तेन बद्धं चैतन्यं तदध्यासाद् एतादृशं जगत्कारणम्. कार्यानुरूपस्यैव कारणस्य युक्तत्वात्. कार्यन्तु जगत्, जडात्मकं हेयं तुच्छनिष्ठम्, अतः कारणेनापि तथायुक्तेन भाव्यम् इति युक्त्याभासः. वस्तुतस्तु ''सत्यञ्चानृतञ्च सत्यमभवत्'' (तैत्ति.उप.२।६) इति ''स आत्मानं स्वयमकुरुत'' (तैत्ति.उप.२।७) इति ''प्रजायेय'' (तैत्ति.उप.२।६) इत्यादिवाक्यैः स्वतःप्रमाणभूतैः निःसन्दिग्धं प्रतिपाद्यते कार्यरूपस्य जगतो ब्रह्मत्वम्.कुत्सितत्वं न क्वचिदपि ब्रह्मविदां हृदये भासते, यथा स्वाङ्गे पुरुषस्य. पृथग्भानएव तथा प्रतीतेः. अन्यथा बीजादीनां ब्रह्मत्वकथनं मलदृष्टान्तेन बाधितं स्यात्. तथा सति सर्वसन्मार्गनाशः. तथा वाक्याभासाः, ''इन्द्रो मायाभिः पुरुरूप ईयते'' (बृहदा.उप.२।५।१९) ''अमृतापिधानाः'' (छान्दो.उप.३।८।१) ''वाचारम्भणं विकारः'' (छान्दो.उप.६।१।४) ''मायां तु प्रकृतिं विद्यात्'' (श्वेता.उप.४।१०) इत्यादयः. एतेषां पदार्थप्राया माया

वाक्यविरोधेन न वाक्यार्थे सङ्गच्छते. तथा च यथायथं ‘माया’शब्देन क्वचिद् इन्द्रियवृत्तिः, क्वचित् प्रथमं कार्यं सूक्ष्मम्. ‘अनृत’शब्देन देहेन्द्रियादिकं ‘‘सत्यञ्चानृतञ्च सत्यमभवत्’’ (तैत्ति.उप.२।६) इति ब्रह्मणएव देहेन्द्रियादिरूपत्वम् आत्मरूपत्वञ्च. नतु अत्र स्वप्नादिदृष्टान्तेन मिथ्यात्वं वक्तुं शक्यते, बाधश्रवणाच्च. ‘‘मिथ्यादृष्टिर् नास्तिकता’’ ‘‘मायेत्यसुराः’’ ‘‘असत्यम् अप्रतिष्ठं ते जगदाहुरनीश्वरम्’’ (भग.गीता१६।८) इत्यादिवाक्यैः. साधकानि च सहस्रशो वाक्यानि सन्ति, ‘‘सभूतं स भव्यम्’’ (महाना.उप.१७।१३) इति ‘‘हरिरेव जगद्’’ इत्यादीनि. अतो बाधितोऽपि अविद्यावादः केषाञ्चिद् हृदये शमादिरहितानां चित्तदोषेण ‘‘जगद् दुष्टम्’’ इति पश्यतां प्रतिभातीति आह किल इति.

तन्मते बन्ध-मोक्षौ निरूपयति स्वाविद्यया इति.

स्वाविद्यया संसरति मुक्तिः कल्पितवाक्यतः।।७९।।

चैतन्यमात्रनिष्ठया जलावरणमलरूपया आत्मानं बहिर्मुखः संसारिणं मन्यते. तस्य च मोक्षः तेनैव विद्यावत्त्वेनैव कल्पितगुरोः उपदेशवाक्याद् इति।।७९।।

मायावादी श्रुति-सूत्रन्के मुख्य अर्थकुं नहीं मानें हे. याको बाध करिके मिथ्यावाक्य मिथ्यायुक्तिन् करिके ब्रह्मके जगत्कर्तापनेमें दोष लगावे हें. परब्रह्मकुं कारण नहीं माने हें. तब वे लोग जगत् बनायवे वारो कौनकुं माने हें? या आशङ्काकुं दूर करिवेके अर्थ मायावादी मतको वर्णन करें हें:

अनादि जो अविद्या अर्थात् जाको आदि नहीं हे एसे भावरूप अज्ञान करिके बंध्यो भयो जो साकार चैतन्य वो या जगत्को कारण हे. जेसो कार्य होवे हे कारण भी वाहीके अनुकूल वेसो ही होवे हे. कार्य जगत् जडरूप तथा हेय हे, कदर्य उत्पत्ति अन्तवारो हे. तासों कारण भी वेसो ही जड-हेय-तुच्छनिष्ठ होनो चहिये ये उनकी मिथ्या युक्ति हे.

सिद्धान्ततो ये हे : वेदव्यासजी महाराजनें ब्रह्मसूत्रन्में श्रुतिन्कुं ही प्रमाण मानी हे. लौकिक युक्तिन्कुं प्रमाण नहीं मानी हे. श्रुतिन्में ब्रह्मकुं कारण बतायो हे. ‘‘सत्यञ्चानृतञ्च सत्यमभवत्’’ (तैत्ति.उप.२।६) या श्रुतिमें कार्यको भी ब्रह्मत्व कह्यो हे ‘‘स आत्मानं स्वयमकुरुत’’ (बृहदा.उप.१।४।३) या श्रुतिमें भगवान्नें अपने आत्माकुंही जगत्रूप कियो ये बात लिखी हे ‘‘बहुस्यां प्रजायेय’’ (तैत्ति.उप.२।६) या श्रुतिमें भगवान् ही बहुत रूप वारे होयवेकी इच्छा करते भये ये बात लिखी हे. उच्च-नीचादि भाव जगत्में दीखें हें तथापि ब्रह्ममें काहु प्रकारको दोष नहीं हे ये बात जताई. स्वयं प्रमाण वेदवाक्यन्सों कार्यरूप जगत्कुं ब्रह्मपनों सिद्ध कियो या ही कारण ब्रह्मज्ञानीन्कुं जगत्को तुच्छपनो अथवा कुत्सितपनो नहीं दीखे हे, निर्दोष ब्रह्मरूप ही दीखे हे. परन्तु जिनकी अविद्या दूर नहीं भई हे उन मनुष्यन्कुं ही जगत्में कुत्सितपनो आदि अनेक दोष दीखे हें. जेसें श्वेत शङ्ख पीलीया वारे मनुष्यकुं पीलो दीखे हे परन्तु शङ्ख तो सफेद ही हे याही प्रकार जगत तो ब्रह्मरूप ही हे, अज्ञानी लोगन्कुं अविद्या करिके अनेक दोषवारो दीखे हे. जेसें पुरुषकुं अपने अङ्गन्में कुत्सित्पनो नहीं मालुम पडे हे एसें ही ब्रह्मके साथ जगत्को अभेद मानवे वारे ज्ञानीन्कुं जगत् कुत्सित नहीं प्रतीत होवे हे. जहां भेद हे तहां ही कुत्सितत्वादि दोष प्रतीत होवे हें. जगत्कुं यदि कुत्सित मानोगे तो छान्दोग्यमें तथा गीतामें ‘‘बीजं मां सर्वभूतानाम्’’ (भग.गीता७।१०) या श्लोकमें बीजन्की ब्रह्मरूपता लिखी हे सो नहीं बन सकेगी. क्योंके जगतरूपी वृक्षकुं यदि कुत्सित-तुच्छ मानोगे तो जीवज, अण्डज तथा अन्नमय बीजकी मलतुल्यता भी कह सकेंगे, तो ब्रह्मपनो नहीं होयेगो. अर्थात् जगद्रूप वृक्षकुं तुच्छ मानोगे तो जगत्को बीज ब्रह्म भी तुच्छ भयो, तब तो ब्रह्मज्ञान होयवेके अर्थ पञ्चाग्निविद्याके साधक जो श्रौतयज्ञादिकर्म तथा स्मृतिके बनाये ज्ञान होयवेके उपाय वृथा ही होंयगे. तब तो सब सन्मार्गको नाश होयगो इति.

आगे ईश्वरकों मायाकृत बन्ध होयवेमें मायावादीके मतानुसार प्रमाण दिखावे हें ‘‘इन्द्रो मायाभिः पुरुरूप ईयते’’ (बृहदा.उप.२।५।१५). माया करिके बहुतरूप जाके हो रहे हें एसो परमेश्वर द्रष्टिगोचर होवे हे, या रीतिको या वाक्यको अर्थ मायावादी करे हें. परन्तु याको एसो अर्थ नहीं हे, अनेक रूपवारो परमेश्वर माया करिके अर्थात् नेत्रादि इन्द्रियजन्य बुद्धिकी

वृत्तिन् करिके दर्शन्में आवे हे या रीतिको अर्थ हे. क्योंके या श्रुतिमें पहिलेके दोय पदमें विना ही माया बहुत रूप धारण करनो लिख्यो हे तासों बहुत रूप धारण करिवेमें माया कारण नहीं हे, बहुरूप वारे परमेश्वरके देखिवेमें माया सहायक मात्र हे.

ऐसेंही ''मायान्तु प्रकृतिं विद्यात् मायिनन्तु महेश्वरम्'' (श्वेता.उप.४।१०) अर्थ:माया प्रकृतिसों कहे हें, प्रकृति सहित परमेश्वरकुं मायी जाननो. या वाक्यमें सत्य प्रकृतिको ग्रहण करनो मिथ्या मायाको ग्रहण नहीं करनो, क्योंके एकादशस्कन्धमें ''प्रकृतिर्ह्यस्योपादानम्'' (भाग.पुरा.११।२४।१९) या श्लोकमें प्रकृति-पुरुष-कालकुं भगवद्रूपता लिखी हे. ''अनृतापिधानाः'' ये श्रुति भी जगत्कुं मिथ्या नहीं कहे हे किन्तु दहरज्ञानीके मनोरथ अनृत करके अर्थात् देहेन्द्रियादिकन् करिके ढके भये इत्यादि अर्थकों कहे हे.

ऐसें ही 'वाचारम्भण' श्रुतिको भी कार्यकुं कारणात्मा मानिकें वाकुं सत्य कहिवेमें ही तात्पर्य हे. 'माया'शब्दके क्रिया, दम्भ, बुद्धि आदि अनेक अर्थ अनेकार्थकोशमें लिखे हें. वेदनिघण्टुमें माया, अभिख्या, वयुन इनकुं बुद्धिके नाम कहे हें. बुद्धि हे सो न्यारी-न्यारी इन्द्रियन् करिके नानाप्रकारकी होवे हे तासों ''मायाभिः'' (बृहदा.उप.२।५।१५) ये बहुवचन हे. ''मायां तु प्रकृतिम्'' (श्वेता.उप.४।१०) या वाक्यमें 'माया'नाम सृष्टिके आरम्भमें जो सूक्ष्म कार्य हे वाको हे. 'अनृत'नाम देहेन्द्रियादि-कको हे. यहां 'अनृत'नाम यदि मिथ्याको होय तो मिथ्या होय सो सत्य नहीं होय सके हे. यों तो आगेकी श्रुति ''सत्यञ्चानृतञ्च सत्यमभवत्'' में अनृत तथा सत्यरूप होते भये ये बात लिखी हे. तासों या वाक्यको एसो अर्थ करनो ''अनृत जो देहन्द्रिया-दिक, सत्य जो जीवात्मा दोनोंरूप सत्य जो ब्रह्म हे सो ही होतो भयो''. याके आदिमें भगवान् बहुरूप होयवेकी इच्छा करते भये ऐसें लिखी हे. अन्त्यमें ''सत्यमभवत्'' अर्थात् सत्य ही होतो भयो ये लिखी हे. 'अनृत'शब्दकुं यदि मिथ्यावाची मानोगे तो आद्यन्तसों विरोध आवेगो. तासों स्वप्नके द्रष्टान्तसों जगत्कुं भ्रमरूप नहीं मान लेनो. ''असत्यम् अप्रतिष्ठन्ते जगदाहुरनीश्व-रम्'' (भग.गीता१६।८) या गीतावाक्यमें जगत्कुं असत्य मानवेवारेन्कुं आसुरजीव कह्यो हे. तथा ''यद्भूतं यच्च भव्यम्'' (ऋग्वेद.मण्ड.१०।९०।२) ''हरिरेव जगत्सर्वम्'' इत्यादि सहस्रवाक्यन्में जगत् भगवद्रूप मान्यो हे. या प्रकार अनेक प्रमाणन्सों खण्डन कियो भयो भी अविद्यावाद चित्तदोष करिके जगत्कुं दोष सहित मानवे वारे शमदमादि साधन रहित पुरुषन्के हृदयसों दूर नहीं होवे हे, उनके हृदयमें वेसो ही भासमान होतो रहे हे.

मायावादीके अनुसार बन्ध-मोक्ष दिखावे हें.

उनके मतमें प्रदेशविशेषमें जलको जो आवरण मल ताके स्थानापन्न अविद्या करिके निष्फल ब्रह्म अपने स्वरूपको ज्ञान भूल जावे हे तब बहिर्मुख होयके आपुन्कों संसारी माने हे ये ही बन्ध हे. मूल अज्ञानसों छूट जानो ही मोक्ष मानें हे. कल्पना करिके ज्ञानवान् माने गये गुरुके उपदेशवाक्यकों ही मोक्षको साधन माने हें तथा जितने लौकिक-वैदिक यज्ञ, भक्ति आदि साधननकुं भ्रमात्मक जगन्मध्यपाति मानिके मिथ्या बतावे हें।।७९।।

ननु एवमेव अस्तु शास्त्रार्थः, को दोषः? इति चेत् तत्र आह एवं प्रतारणाशास्त्रम् इति.

एवं प्रतारणाशास्त्रं सर्वमाहात्म्यनाशकम्।।
उपेक्ष्यं भगवद्भक्तैः श्रुति-स्मृतिविरोधतः।।

यथा प्राणिनो भगवद्विमुखाः भवन्ति तथोपायो रचितः. ननु अत्र किञ्चित् ज्ञातव्यम् अस्ति. तत्र हेतुम् आह सर्वमाहात्म्यनाशकम् इति. यद्धि सर्वोपास्यं तस्य माहात्म्यं नाशयति, सर्वेश्वरः सर्वकर्त्ता सर्वकारणरूपः इत्यादिरूपम्. तर्हि एतन्मतं सर्वं लिखित्वा दूषणीयम् इति चेत्, न, इति आह उपेक्ष्यम् इति. असद्भावनया स्वस्यापि बुद्धिनाशः स्यात् अतः तत्र उपेक्षैव कर्तव्या सुतरां भगवद्भक्तैः, भक्तिमार्गविरोधात्. दूषणम् आह श्रुतिस्मृतिविरोधतः इति. स्वप्रकरण-पठितैः ''आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते'' (तैत्ति.उप.३।६) इति ''अहं सर्वस्य जगतः प्रभवः प्रल-स्तथा''(भग.गीता७।६) इति वाक्यसहस्रैः मायावादो विरुद्ध्यते.

सर्वेषाम् आदरान्यथानुपपत्तिं परिहरति कलौ तदादरो मुख्यः इति.

कलौ तदादरो मुख्यः फलं वैमुख्यतस्तमः।।८०।।

तत्रापि हेतुः फलं वैमुख्यतः इति. भगवद्वैमुख्यात् तमो भावि।।८०।।

या रीतिको मोह करायवे वारो शास्त्र प्राणिनकुं भगवान्सों विमुख करिवेके अर्थ बनायो हे. या रीतिके शास्त्रमें कोई भी बात जानिवे योग्य नहीं हे. भगवान् सबके ईश्वर हें, सबके कर्ता हें, कारणके भी कारण हें या रीतके सर्वोपास्य पुरुषोत्तमके माहात्म्यको नाश करिवेवारो ये मायावाद भक्तिमार्गको विरोधि हे, तासों भगवद्भक्तन्कुं या मतकी उपेक्षा कर देनी चहिये.

या मायावादमें ''आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते'' (तैत्ति.उप.३।६) ''अहं सर्वस्य जगतः प्रभवः प्रलय-स्तथा'' (भग.गीता१०।८) इत्यादि हजारन् वाक्यको विरोध हे. कलियुगमें या मतको बहुत आदर हे, या करिके आसुरजीव भगवान्सों विमुख होयकें तमके भागी होंयगे।।८०।।

ननु स्वात्मज्ञानान् मोक्षः सिद्ध्यत्विति प्रपञ्चनिवृत्त्यर्थं प्रपञ्चस्य अज्ञानकार्यत्वम् उच्यते.

ज्ञाननाश्यत्वसिद्ध्यर्थं यदेतद् विनिरूपितम्।।

तदन्यथैव संसिद्धिं विद्याऽविद्यानिरूपणैः।।८१।।

यतो ज्ञानम् अज्ञानस्यैव नाशकमिति सकार्याम् अविद्यां विद्या नाशयत्विति जगतो मायिकत्वं प्रतिपाद्यते, इति चेत्, तत्र आह तदन्यथैव संसिद्धम् इति. नहि ब्रह्मविद्यायां प्रपञ्चविलयो अपेक्ष्यते. तथा सति प्रलयवत् सर्वेषाम् अना-दरणीयता स्यात्. अतो विद्याविद्यानिरूपणैः साधनशास्त्रैरेव अन्यथासिद्धमिति न तदर्थं प्रपञ्चविलयो वक्तव्यः. ''वि-द्याञ्चाविद्याञ्च'' (ईशोप.११) इत्यादि श्रुतयो अत्र अनुसन्धेयाः. हृदये स्वयं भासमानो भगवान् मोक्षं दास्यति, किं प्रपञ्चविलयेन? इति भावः।।८१।।

शङ्का:आत्मज्ञानसों मोक्ष होवे हे. यासों विद्या अर्थात् ज्ञान हे सो जगद्रूप कार्य सहित अविद्याको नाश करे हे. जगत्कुं मायिक अर्थात् अविद्याको कार्य मानें हे, क्योंके जगत् यदि अविद्याको कार्य न होय तो ज्ञानसों केसें निवृत्त होय.

उत्तर:अविद्याको कार्य अहन्ता-ममतारूप संसार ही हे, जगत् अविद्याको कार्य नहीं हे. एवञ्च विद्या अर्थात् ज्ञानसों भी अहन्ता-ममतारूप संसारको ही नाश होवे हे, जगत्को नाश ज्ञानसों नहीं होय हे. ब्रह्मज्ञानमें जगत्के लय होयवेकी अपेक्षा नहीं हे. एसें ही होतो तो जेसें प्रलयकु कोई पुरुषार्थ नहीं समुझे हे एसे ही ब्रह्मविद्या भी अनादर करिवेयोग्य होय जायगी तासों विद्यासों अविद्याकी निवृत्ति करिवेवारे शास्त्रन्सों प्राप्त होतो ज्ञान अज्ञानत्मक अहन्ता-ममतारूप संसारकी निवृत्ति करे हे ये ही बात सिद्ध होय हे. अतः मोक्षको अर्थ:जगत्को लय होनो एसे नहीं कहेनो चहिये. ''विद्याञ्चाविद्याञ्च'' (ईशोपनि.११) या श्रुतिके अन्तमें भी ''विद्ययामृतमश्नुते'' या वाक्यमें ब्रह्मसाक्षात्कार करिके अमृत-मोक्षकी प्राप्ति लिखी हे. तासों हृदयमें भास-मान भये भगवान् स्वयं मोक्ष देंयगे, जगत्के लय होयवेसों कहा प्रयोजन हे?।।८१।।

ननु पुराणेषु मायिकत्वं श्रूयते प्रपञ्चस्य ''विद्धि माया मनोमयम्'' (भाग.पुरा.११।७।७) ''त्वय्युद्धवाश्रयति'' (भाग.पुरा.११।१९।७) इत्यादिषु. ततो लाघवात् मायावादएव बुद्धिसौकर्याद् अङ्गीकर्तव्यः इति आह यन्मायिकत्व-कथनम् इति.

यन्मायिकत्वकथनं पुराणेषु प्रदृश्यते।।

तदैन्द्रजालपक्षेण मतान्तरमिति ध्रुवम्।।

एवम् अनूद्य परिहरति तदैन्द्रजालपक्षेण इति. सृष्टिभेदेषु ऐन्द्रजालपक्षो निरूपितः. सएव पुराणेषु वैराग्यार्थं निरूप्यते. अतो न वस्तुनिरूपकं किन्तु तन्मतान्तरम् असुरव्यामोहजनकम्. पुराणानि भगवल्लीलाप्रतिपादकानि भगवच्चरित्रवद् दैत्यानं मोहम् उत्पादयन्ति.

एवमेवेति अत्र उपपत्तिम् आह नास्ति श्रुतिषु इति.

नास्ति श्रुतिषु तद्वार्ता दृश्यमानासु कुत्रचित्।।८२।।

यदि जगतो मायिकत्वं ज्ञानार्थं कर्मार्थं वा अभिमतं स्यात् तदा काण्डद्वयमध्ये क्वचिदुक्तं स्यात्. ननु सर्वे वेदाः त्वया न ज्ञायन्तइति कथं ज्ञायते न उक्तम्? इति चेत् तत्र आह दृश्यमानासु इति. एकादशशाखाः साम्प्रतं प्रचरन्ति, तासु न दृश्यते इति अर्थः।।८२।।

पुराणन्में जो कहुं-कहुं ''विद्धि मायामनोमयम्'' (भगा.पुरा.११।७।७) ''त्वय्युद्भवाश्रयति यस्त्रिविधो विकारः'' (भाग.पुरा.११।१९।७) इत्यादि स्थलन्में जगत्कुं मायिक बतायो हे सो या ग्रन्थमें पहिले कहे भये वैदिक सृष्टिके प्रकारन्में इन्द्रजालके समान जो सृष्टिको प्रकार लिख्यो हे-जा सृष्टिके भगवान् उपादान कारण नहीं हे केवल मायाद्वाराही होय हे-वो भगवान्को वैराग्यगुण दिखायवेके अर्थ कियो हे. वाही मिथ्या सृष्टिको निरूपण पुराणन्में कहुं-कहुं हे सो लोग जगत्कुं मिथ्या समुझिके अहन्ता-ममता छोड देंगे तो उनकुं वैराग्य सिद्ध हो जायगो याके अर्थ कियो हे.

या पक्षसों पदार्थको ज्ञान नहीं होय हे किन्तु ये मतान्तर हे, आसुरजीवन्कुं मोहजनक हे. भगवल्लीलाके कहिवे वारे पुराण अवतारन्में आसुरजीवन्की भक्ति जा तरेहसुं नहीं होय वा तरेहसुं मोहक चरित्रको वर्णन करे हें. जेसें शाल्व दैत्यके लाये भये मिथ्या वसुदेवके मस्तकको खण्डन देखिके श्रीकृष्णको शोच करनो मतान्तरके अभिप्रायसों शुकदेवजीनें भागवतमें लिखिकें वाको खण्डन कर दीनो हे एसें ही जगन्मिथ्यापक्ष लिखिके पुराण दैत्यनकुं मोह करावे हें. जगत्के मिथ्यापनेको ज्ञानमें अथवा कर्ममें उपयोग होय तो वेदके दोउ काण्डमें लिख्यो दीखवेमें आनो चहिये. कदाचित् कहोगे के सब वेदकों आप जानो नहीं हो तब केसें मालुम पडी के वेदमें नहीं लिख्यो हे?

तहां आप आज्ञा करे हें के या समयमें वेदकी ग्यारह शाखाको प्रचार हे. उनमें कहुं नहीं लिख्यो हे. उन शाखान्के नाम या प्रकारहें:

१.तैत्तिरी २.काण्वी ३.माध्यन्दिनी ४.मैत्रायणी ५.मानवी ये पांच यजुर्वेदकी शाखा हें. हिरण्यकेशी तैत्तिरीको ही नामहे.
६.शांखायनी ७.आश्वलायनी ये दो ऋग्वेदकी शाखाहें. ८.कौथुमी ९.राणायनी ये दो सामवेदकी शाखाहें. १०.शौनकी तथा ११.पैप्पलादी ये दो शाखा अथर्ववेदकी हें।।८२।।

ननु अस्ति सामशाखायाम् उत्तरकाण्डे वाचारम्भणवाक्यम् इति चेत् तत्र आह वाचारम्भणवाक्यानि इति.

वाचरम्भणवाक्यानि तदनन्यत्वबोधनात्।।
न मिथ्यात्वाय कल्प्यन्ते जगतो व्यासगौरवात्।।८३।।

अत्र उपक्रमे ''कतमः स आदेशः'' (छान्दो.उप.६।१।३) इति प्रश्ने ''यथैकेन मृत्पिण्डेन'' (छान्दो.उप.६।१।४) इत्यादिदृष्टान्तैः सामान्यलक्षणाप्रत्यासत्तिरिव निरूपिता. दृष्टान्ते कार्य-कारणयोः उभयोरपि प्रत्यक्षत्वम्, दार्ष्टान्तिकेषु कार्यं प्रत्यक्षसिद्धं, कारणं श्रुतिसिद्धम्, कारणताप्रकारश्च. तत्र कार्य-कारणयोः अभेदो बोधनीयः. अन्यथा एकविज्ञानेन सर्वविज्ञानं न स्यात्, प्रकारभेदानाम् अज्ञानात्. अतः कार्यप्रकाराः व्यवहारार्थं वाचा सङ्केतिता घटः, पटः इत्यादयः, नतु तेन रूपेण तेषां वस्तुत्वम्. तथा सति एकविज्ञानेन सर्वविज्ञानं न भवेत्. सत्यता तु ''मृत्तिकेत्येव'' (छान्दो.उप.६।१।४) इति कारणत्वेनैव. अतः कार्याणां तदनन्यत्वमेव श्रुत्या बोध्यते, नतु मिथ्यात्वं, शुक्तिरजतवत्. अन्यथा शुक्तिरजतादिकमेव दृष्टान्तीक्रियते. नापि तत्र सामान्यलक्षणा सम्भवति, भ्रमाणाम् अनन्तरूपत्वात्. तस्माद् वाचारम्भणवाक्यानि जगतो मिथ्यात्वाय न कल्प्यन्ते. तथैव आह सूत्रकारः ''तदनन्यत्वम् आरम्भण-

शब्दादिभ्यः'' (ब्रह्मसूत्र२।१।१४) इति. ननु यथा व्यासो महान् तथा शङ्करादिरपि; ततः तद्विरोधात् कथम् एवं निर्णयः? तत्र आह व्यासगौरवाद् इति. व्यासो अस्माकं गुरुः अतो व्यासाभिप्रेतविरुद्धं नाङ्गीक्रियते इति अर्थः।।८३।।

सामवेदकी शाखामें 'वाचरम्भण' श्रुतिसों जगत्‌को मिथ्यात्व सिद्ध होय हे एसे कहिवे वारे मायावादीके प्रति 'वाचा-रम्भण' श्रुतिको ठीक-ठीक अर्थ दिखावे हें.

''वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' या श्रुतिके आरम्भके पूर्व मृत्तिकापिण्डको दृष्टान्त दियो हे. जेसे एक मृत्तिकापिण्डके जानिवेसों जितने माटीके बने पदार्थ हें उनको ज्ञान होवे हे या प्रकार सामान्य रीतिसों ब्रह्मको लक्षण दिखायो. दृष्टान्तमें कारण मृत्तिका तथा कार्य घडा-चप्पन आदि प्रत्यक्ष दीखवेमें आवे हें. जाके अर्थ दृष्टान्त दियो वा दार्ष्टा-न्तिकमें कार्य-जगत्‌के पदार्थ तो दीखवेमें आवे हे, कारण जो ब्रह्म हे सो केवल शास्त्र मात्रसों जान्यो जाय हे. तथा जेसे मृत्ति-कासों घटको भेद नहीं हे या प्रकार ब्रह्मसों भी जगत् अलग नहीं हे. यदि अलग होय तो ब्रह्मज्ञान् सों जगत्‌को ज्ञान नहीं होय सके. अनेक घट-पट आदि पदार्थनकुं व्यवहारमें लायवेके अर्थ ''एसो होय तासों घडा कहनो''-''एसो होय तासों कूंडा कहनो'' या रीतिसों नाम धरि दीने हें. विचारपूर्वक देख्यो जाय तो ये सब मृत्तिका ही हे, तासों ''मृत्तिका सत्य हे'' या श्रुतिसों कार्य जो हे सो कारणसों अलग नहीं हे ये बात जताई हे.

जगत् मिथ्या हे ये बात श्रुतिन्सों नहीं सिद्ध हो सके हे. एसो ही यदि श्रुतिको अभिप्राय होतो तो ''छीपमें जो चांदीको भ्रम होवे हे सो चांदी मिथ्या हे'' एसो ही दृष्टान्त देनो योग्य हतो. जगत् यदि मिथ्या होय तो सत्य ब्रह्मज्ञान्सों मिथ्या जगत्‌को ज्ञान केसे सम्भव होय सके हे तथाच एक ज्ञान् सों सर्व पदार्थको ज्ञान हो जायवेकी जो प्रतिज्ञा हे ताकी हानि होय हे, तासों जगत्कुं मिथ्या बनायवेके अर्थ ये श्रुति नहीं हे. सूत्रकार वेदव्यासजीनें भी ''तदनन्यत्वमारम्भणशब्दादिभ्यः'' (ब्रह्म-सूत्र२।१।१४) या सूत्रमें जगत्‌को ब्रह्मके साथ अभेद ही सिद्ध कियो हे.

शङ्का:कदाचित् कहोगे के जेसे व्यासजी बडे हें वेसे शङ्कराचार्यजी भी तो बडे हें, उनके वाक्यन्कुं भी प्रमाण माननो चहिये आपके करे निर्णयमें तो शङ्कराचार्यके वचनन्को विरोध आवे हे.

समाधान:तहां आज्ञा करें हें व्यासजी हमारे गुरु हें अर्थात् वेदान्तविचार करिवेवारे हम सबनके निर्वाह करिवेवारे हें. तात्पर्य ये हे के व्यासजी सूत्रन्कुं बनायकें श्रुतिके सन्देहन्कों नहीं मेटते तो हम वेदान्तविचार कैसे करि सकते तासों व्यासजीके अभिप्रा-यसों विरुद्ध मतकुं हम नहीं मानें हें।।८३।।

ननु सर्वेषां विचारो महान्. तत्र सूत्रेषु उक्तानुक्तदुरुक्तचिन्तायाअपि वक्तव्यत्वात् कथम् एकान्ततो निर्णयः? सृष्ट्यादिवाक्यानि अर्थवादरूपाणि अतः तेषां स्तावकत्वमेव मुख्यमिति सृष्ट्यादौ तात्पर्याभावात् ज्ञानस्यैव फलसाध-कत्वात् क्रियावद् ज्ञानस्य अर्थवादवाक्यप्रयोजनाभावाद् वस्तुस्वरूपज्ञाने कार्यापेक्षया विवर्तस्य प्रयोजकत्वात् मिथ्या-त्वमेव स्वीक्रियताम् इति आह ज्ञानार्थम् इति.

ज्ञानार्थम् अर्थवादश्चेच्छ्रुतिः सृष्ट्यादिरूपिणी।।
अनङ्गीकरणाद्युक्तं विधिमाहात्म्ययोर्न तत्।।८४।।

परिहरति अनङ्गीकरणाद् इति. भवेद् एतदेवं यदि मिथ्यावादिमते सृष्ट्यादिवाक्यैः सह महावाक्यस्य एकार्थता सम्भवति. पूर्वकाण्डे विध्येकवाक्यता अर्थवादानां ''स्तुत्यर्थेन विधीनां स्युः'' (मीमां.सूत्र१।२।७) इति उत्तरकाण्डे ब्रह्मवादिनां माहात्म्यज्ञानेन एकवाक्यता. अन्येषां मतेतु न वेदान्तेषु माहात्म्यज्ञानम् उपयुज्यते, नापि विधिः. अतएव एकवाक्यताभावात् न एवम् अर्थः स्वीकर्तव्यः।।८४।।

शङ्का:वेदार्थ जानिवेके अर्थ विचार ही बडो साधन हे. विचारके द्वारा व्याससूत्रको अर्थ अन्य आचार्यन्नें भी कह्यो हे तहां आपको ही कियो अर्थ व्यासजीके सम्मत हे अन्यको कियो अर्थ व्यासजीके अभिप्रायके विरुद्ध हे या बातको निर्णय केसे होय? तासों विचार करनों ही योग्य हे. तहां मोक्षको देवे वारो ज्ञान हे. सृष्टिके कहिवे वारे वेदके जितने वाक्य हें वे सब अर्थ-वादरूप हें, अर्थात् स्तुति करिवे वारे हें. तथा जगत्कों यदि ब्रह्मको कार्य मानोगे तो ब्रह्म विकार वारो माननो पडेगो, क्योके कारणमें कछु विकार भये विना वो कार्यरूप नहीं बन सके हे. तथा कार्यके द्वारा कारणको विलम्बसों ज्ञान होय हे, विर्वत (भ्रम)के द्वारा भ्रमके आधारको शीघ्र ज्ञान होवे हे तासों जगत्कुं मिथ्या भ्रमरूप ही माननो उचित हे.

उत्तर:तुमारे मतमें सृष्टिवर्णन करिवेवारे वाक्यन्की ''तत्वमसि'' आदि महावाक्यन्के साथ एकवाक्याता नहीं सम्भव हो सके हे क्योंके तुमारे मतमें तो ज्ञान ही मोक्षको साधन हे, अर्थात् मोक्षके देवेमें असहायशूर हे. तासों सृष्ट्यादि वाक्य व्यर्थ ही होंयगे, क्योंके ''तत्वमसि'' ये वाक्य विधिरूप नहीं हे तासों सृष्ट्यादि वाक्य कोनकी स्तुति करिवे वारे होंयगे? स्तुति करिवे वारे भये विना एकवाक्यता होनी दुर्घट हे. अतएव जगन्मिथ्यात्वरूप अर्थ भी नहीं मानवे योग्य हे.

हमारे ब्रह्मवादीन्के मतमें तो पूर्व काण्डमें यज्ञादिकन्में प्रवृत्ति करिवेके अर्थ विधिकों जेसे अर्थवादकी अपेक्षा रहे हे तेसें उत्तर काण्डके ज्ञानवाक्य भी जननादि माहात्म्यज्ञानके द्वारा ब्रह्मज्ञान सिद्ध होयवेके अर्थ सृष्टिवाक्यन्की अपेक्षा राखे हें, तासों एकवाक्यता बन सके हे. क्योंके जिन वाक्यन्को प्रयोजन एक होय तथा परस्पर आकांक्षावाले होंय उन वाक्यन्की एक-वाक्यता होवे ये एकवाक्यताको लक्षणहे।।८४।।

ननु अस्तु एकवाक्यतायां प्रकार: अध्यारोपापवादः. पूर्वश्रुत्या प्रथमं जगज्जननम् उक्त्वा कर्तृत्व-भोक्तृत्वे ब्रह्मणि प्रतिपाद्य तद्द्वारा सोपाधिके ब्रह्मणि बुद्धौ सिद्धायां, शाखारुन्धतीन्यायेन पूर्वोक्तम् अपोह्य कर्तृत्वाद्यपेतं पश्चाद् ब्रह्म बोध्यते इति आह अपवादार्थम् इति.

अपवादार्थमेवैतद् आरोपो वस्तुतो न हि।।
दृढप्रतीतिसिद्ध्यर्थम् इति चेत् तन्न युज्यते।।८५।।

एतस्य कर्तृत्वादे: आरोप:. तस्य प्रयोजनम् दृढप्रतीतिसिद्ध्यर्थम् इति. अतो न ब्रह्मणि वस्तुतः कर्तृत्वम्, इति चेत्, न एवं वक्तुं युक्तम्।।८५।।

शङ्का:जेसे कोई पुरुष अरुन्धतीके ताराकों नहीं जानतो होय वा पुरुषकुं अरुन्धतीको ज्ञान करायवेके अर्थ जा वृक्षकी शाखाके ऊपर अरुन्धतीको तारा होय वा शाखाकुं अरुन्धतीके नामसों बतावे हें. ता पीछे मुख्य अरुन्धतीको ज्ञान करवायके शाखामें अरुन्धतीके ज्ञान्कुं दूर करदे हें. एसें ही निराकार ब्रह्मज्ञान करायवेके अर्थ सृष्टिवाक्यन् करिके ब्रह्मकुं कर्ता-भोक्ता बतायकें मायिक सगुण ब्रह्मको ज्ञान करावे हें. ता पीछें वाक्यन् करिके कहे भये कर्ता भोक्तापनेको निषेध करिके शुद्ध ब्रह्मको ज्ञान वेद करावे हे. तासों ज्ञानवाक्यन्कुं कर्ता-भोक्तापनेको निषेध करिवेके अर्थ पहिले झूठो कर्ता-भोक्तापनो नहीं भये विना निषेध कायकी करी जाय? तासों वाक्यन्सों कर्ता-भोक्तापनेको प्रतिपादन करिवेवारे सृष्टिवाक्यन्की अपेक्षा हे. यासों एकवाक्यता बन सके हे.

उत्तर:जेसे वन्ध्याके पुत्रको निषेध करिवेके अर्थ कोई झूठो वन्ध्याको पुत्र बनावे तो वो पुत्र वाणीमात्रमें ही आ सके हे, इन्द्रियन्सों वाकी प्रतीति नहीं होवे हे. एक ही इश्वरमें कर्ता-भोक्तापनेको निषेध करिवेके अर्थ वेदमें सृष्ट्यादि वाक्यन् करिके मिथ्यासृष्टिकी कल्पना करी होय तो ये जगत् वाणीमात्रमें आनो चहिये, प्रत्यक्ष प्रतीत नहीं होनो चहिये।।८५।।

तत्र हेतुः मुख्यार्थबाधनम् इति.

मुख्यार्थबाधनं नास्ति कार्यदर्शनतः श्रुतेः।।

ऐन्द्रजालिकपक्षेऽपि तत्कर्तृत्वं नटे यथा।।८६।।

अपवादार्थं जगत्कथने तस्य सती प्रतीतिः न स्यात्. न हि जगत्प्रतीतिः वेदसिद्धा येन प्रथमं बोधयति पश्चात् निषेधति; लोकसिद्धा हि एषा, तथा च तत्कर्तारमेव आह. जगदनूद्य तत्कतृत्वं बोधयित्वा यदि हि निषेधं कुर्यात् तदा कार्यस्य विद्यमानत्वात् कर्त्रन्तराभावाच्च बाधितविषया स्यात्. सर्वतो बलवती हि अन्यथानुपपत्तिः. वेदोऽपि स्वभ्रान्तिकल्पितः इति महत्साहसम्. किञ्च स कल्पको न अस्मदादिः, तथा सति पारम्पर्यं न उपपद्येत. ''वैधर्म्याच्च न स्वप्नादिवत्'' (ब्रह्मसूत्र२।२।२९) इति न्यायविरोधश्च. अतः प्रपञ्चप्रतीतेः विद्यमानत्वात् मुख्यार्थबाधनं नास्ति.

अथ ग्रहिलतया मायासहितस्यैव कर्तृत्वम् अङ्गीक्रियते, प्रपञ्चस्य च मायिकत्वं, तदा लौकिकमायिनो दृष्टान्तीकर्तव्यः. तत्रच तादृशप्रदर्शनसामर्थ्यरूपमन्त्रादिना कर्तृत्वं नटे वर्ततएव इति आह ऐन्द्रजालिकपक्षेऽपि इति. दर्शनन्यायश्रुतिभिः न जगतो मिथ्यात्वम् इति भावः।।८६।।

शङ्का:जगत्की प्रतीति वेदसिद्ध नहीं हे तासों वेद पहिले कहिके फिर निषेध कर सके हे.

समाधान:जगत् तो प्रत्यक्ष दीख ही रह्यो हे, तासों वेद तो या जगत्के करिवे वारेकुं बतावे हे. कहोगे के वेद हे सो जगत्को करिवे वारो ईश्वर हे ये पहिली कहके पीछें कहे हे जगत्के करिवे वारो ईश्वर नहीं हे, ईश्वरतो अकर्ता हे, तब तो कार्यरूप जगत् तो विद्यमान ही हे, ईश्वर विना अन्य कोई कर्ता होय नहीं सके हे, फिर वेदको अकर्तापनेंको कथन असम्भव होयवेसों वञ्चक मनुष्यके वचनके समान भयो.

ओर वेद भी भ्रम करिकें कल्पित हे एसें कहोगे तो नास्तिकके समानता तथा दुराग्रहीपनो प्राप्त होयगो. वेद यदि अस्मदादिकनकी कल्पनासों बन्यो होय तो वेदके पढवे-पढायवेकी परम्परा अनादिसु चली आवे हे वो नहीं बन सकेगी. तथापि यदि जगत्कुं मिथ्या मानोगे तो ''वैधर्म्याच्च न स्वप्नादिवत्'' (ब्रह्मसूत्र२।२।२९) या व्याससूत्रसों विरोध आवेगो. क्योंके या सूत्रमें स्वप्नादिकन्के तुल्य जगत् नहीं हे ये बात स्पष्ट लिखी हे. तासों प्रत्यक्ष विद्यमान जगत्रूप कार्यको कर्तापणों जो वेदने ब्रह्ममें बतायो हे ताको निषेध नहीं करनो.

मायावादी यदि हठ करिकें मायासहित ब्रह्मकुं जगत्को कर्ता मानेंगे तथा जगत् माया करिके बन्यो भयो मानेंगे तब तो जेसे नट मन्त्र-तन्त्रादिकन् करिके मिथ्या वृक्षादिकन्कुं दिखावे हे तथा उनको कर्ता नट ही कहावे हे एसें ही मायिक जगत्को कर्ता ईश्वर ही भयो।।८६।।

मिथ्यात्वाङ्गीकारे बाधकम् आह मुक्तिस्तदा इति.

मुक्तिस्तदातिनष्टा स्यात् स्वप्नदृष्टगजेष्विव।।

कृत्स्नस्य प्रपञ्चस्य कल्पितत्वे तन्मध्यपातात् मनुष्यादीनां मुक्त्यर्थं प्रयत्नो व्यर्थः स्यात्. न हि मायायां प्रतीताः पारावताः कदाचिदपि मुच्यन्ते, नापि स्वप्नदृष्टाः गजाः. अतो अखिलजगत्साक्षी भगवानेव मुच्येत नतु अस्मदादयः, तन्मायापरिकल्पितत्वात्. तथा सति व्यर्थः पारलौकिकप्रयासः. अस्मदज्ञानपरिकल्पितत्वन्तु मोहार्थमिति पक्षद्वयेऽपि मायावादो बाधितः. उपहितचैतन्यरूपभगवन्मायापक्षे अस्मदज्ञानपरिकल्पनापक्षे च.

स्वप्रवृत्तिविघातेन गुर्वादीनां च दूषणात्।
मायावादो न मन्तव्यः सर्वव्यामोहकारकः।।

ननु अस्तु मायैव कर्त्री, तदुपहितो जीवो वा ''ब्रह्म तूभयबिम्बरूपम्'' इति श्रुतौ तत्कर्तृत्वं बोध्यते इति आशङ्क्य आह मायादीनां च कर्तृत्वम् इति.

मायादीनाञ्च कर्तृत्वं श्रुतिसूत्रैर्विबाध्यते।।८७।।

‘‘कथमसतः सज्जायेत’’ (छान्दो.उप.६।२।२) ‘‘स ईक्षां चक्रे’’ (प्रश्नोपनि.६।३) ‘‘ईक्षतेर्नाशब्दम्’’ (ब्रह्मसूत्र१।१।४) ‘‘कामाच्च नानुमानापेक्षा’’ (ब्रह्मसूत्र१।१।१७) ‘‘नेतरोऽनुपपत्तेः’’ (ब्रह्मसूत्र१।१।१५) इत्यादिश्रुतिसूत्रैः मायायाः प्रकृतेः जीवस्य च कर्तृत्वं निषिध्यते।।८७।।

जगत्कुं मिथ्या मानिवे पर स्वप्नमें देखे गये हाथीकी मुक्तिके समान् संसारी जीवकी मुक्ति अति नष्ट हो जायगी.

या पक्षमें मुक्तिको अत्यन्त नाश प्राप्त होवे हे. क्योंके सब जगत् जब इन्द्रजालके समान कल्पित हे तब तो मनुष्य भी जगत्में आयगये इतनें वे भी मिथ्या–कल्पित ही भये. तब तो इनको मुक्तिके अर्थ प्रयत्नकरनो वेसे ही वृथा होयगो जेसे इन्द्रजालके बने भये कबूतर आदि पदार्थन्को कभी मोक्ष नहीं होवे हे, जेसे स्वप्नके हाथीकी मुक्तिके अर्थ कोई भी पुरुष प्रयत्न नहीं करे हे. या पक्षमें जगत्के साक्षी भगवान् ही मुक्त माने जायेंगे. उनकी मायाके बने भये अस्मदादिक जीव सब बद्ध ही रहेंगे. तब तो परलोककी प्राप्ति हायवेके अर्थ जो शास्त्रमें साधन लिखे हें उनको परिश्रम व्यर्थ ही होयगो.

वाचस्पतिमिश्र कहे हें ‘‘जगत् जीवके अज्ञानको बनो भयो हे’’ ये उनको कहनो धोका देवेके अर्थ हे.

‘‘सूर्याचन्द्रमसौ’’ (ऋग्वेद:१०।१९०।१) या श्रुतिमें सूर्यादि सब पदार्थकों ब्रह्मके बनाये भये कहे हें. यासों भी विरोध आवे हे.

किञ्च इन दोउ पक्षन्में जीवकी मुक्तिमें प्रवृत्तिको विघात होवेगो तथा शिष्य–शास्त्र–गुरु ये सब मिथ्या ही होवेंगे. तासों सबन्कुं मोह करायवे वारो मायावाद नहीं माननो चहिये.

शङ्का:सांख्यकी रीतिसों माया जगत्की करिवेवारी हे एसो माननो; अथवा माया करिके (उपहित) चारों ओरसों ढक्यो भयो जीव ही जगत्को करिवेवारो हे ऐसो माननो. ईश्वर तो मायाको अथवा जीवको बिम्बरूप हे. मेघन्के चलवेमें जेसे चन्द्रमा चले हे एसो प्रतीत होवे हे एसें ही मायादिकन्के जगत् बनायवेमें ब्रह्म जगत् बनावे हे एसी प्रतीति होवे हे. तासों वेदमें ब्रह्मकुं जगत्को कर्ता कह्यो हे.

उत्तर:‘‘कथमसतः सज्जायेत’’ (छान्दो.उप.६।२।२) अर्थ:असत् अर्थात् झूठे पदार्थसुं सत्य पदार्थ केसें बन सके हे? ‘‘यदिदं किञ्च तत्सत्यम्’’ (तैत्ति.उप.२।६) इत्यादि श्रुतिन्सों सिद्ध होवे के ब्रह्म भी सत्य हे तथा जो कछु पदार्थ प्रत्यक्ष दीखें हे वे भी सब सत्य हें. या श्रुति करिके मायाके कर्तापणेको निषेध सिद्ध होवे हे. ‘‘नेतरोनुपपत्तेः’’ (ब्रह्मसूत्र१।१।१५). या सूत्रसों भी जीवके कर्तापणेको निषेध व्यासजीने कियो हे. जा समय सृष्टिकी आदिमें जीवन्के शरीर ही पैदा नहीं भये वा समयमें शरीर विना जीव जगत्कुं कैसे बनाय सके हे? एसें अनेक श्रुति–सूत्रन करिके जीव तथा माया कर्ता नहीं बन सकें हे ये सिद्ध होवे हे।।८७।।

ननु ब्रह्मणि कर्तृत्वनिषेधः श्रूयते अस्थूलादिवाक्यैः. तथा निरञ्जनश्रुतिः ‘‘अकर्ता अभोक्ता च’’ इति. ‘‘अहङ्कारविमूढात्मा कर्ताहमिति मन्यते’’(भग.गीता३।२७) इति एतद् अन्यथानुपपत्त्या, कर्तृत्वस्य भ्रान्तिसमानाधिकरणत्वं लोके दृष्टमिति दूषणभयाद् ब्रह्मणि कर्तृत्वं न अङ्गीक्रियते इति आशङ्क्य आह अकर्तृत्वञ्च इति.

अकर्तृत्वञ्च यत्तस्य माहात्म्यज्ञापनाय हि।।

ब्रह्मणि अलौकिकं कर्तृत्वं वदन् अकर्तृत्वम् आह लौकिककर्तृत्वनिषेधार्थम्. अन्यथा ‘‘अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा’’ (भग.गीता७।६) इति स्वयं पश्चात् कर्तृत्वम् उच्यमानं विरुद्ध्येत. एतदेव अभिसन्धाय केनचिद् उक्तं ‘‘न प्रमाणमनाप्तक्तिर्नादृष्टे क्वचिदाप्तता, अदृश्यदृष्टौ सर्वज्ञः’’ (न्यायकुसुमाञ्जलि:३।१६) इति. अतो माहा–

त्म्यज्ञापनार्थमेव अकर्तृत्वकथनम्, यथा ''पुरुष एवदं सर्वम्'' (ऋग्वेद:१०।९०।२) ''उतामृतत्वस्येशानः'' (तत्रैव) ''एतावानस्य महिमा'' (तत्रैव१०।९०।३) इति 'हि' शब्दार्थः.

माहात्म्यबोधनप्रकारम् आह विरुद्धधर्मबोधाय इति.

विरुद्धधर्मबोधाय न युक्त्यैकस्य वारणम्।।८८।।

यत्र एवं परस्परविरुद्धाः धर्माः बोध्यन्ते सएव महान्. ते धर्माः उभये सत्याः, अन्यथा माहात्म्यं न सिद्ध्येत्, नटवत्. अतो युक्त्या अन्यतरस्य न बाधः।।८८।।

शङ्का:''अस्थूलमनण्वम्'' (बृहदा.उप.३।३।८) इत्यादि ''निरवद्यं निरञ्जनम्'' (मुण्ड.उप.३।१।३) इत्यादिवाक्यन् सों ब्रह्मके कर्तापणेंको भी तो निषेध सिद्ध होवे हे. गीतामें ''अहङ्कारविमूढात्मा कर्ताहमिति मन्यते'' (भग.गीता३।२७) या वाक्यसों भी ये ही निश्चय होय हे. लोकमें जो कर्ता दीखे हे वो अहङ्कार-मोह-भ्रमवारो दीखे हे. ब्रह्मकुं भी कर्ता मानोगे तो ब्रह्ममें भी ये दोष आवेंगे तासों ब्रह्मकुं कर्ता नहीं माननों चहिये.

उत्तर:श्रुति हे सो ब्रह्ममें अलौकिक कर्तापणेको स्थापन करती भई अहङ्कारादि दोष सहित लौकिक कर्तापणेको निषेध करि-वेके अर्थ ब्रह्मकुं अकर्ता कहे हे. सर्वथा कर्तापणेके निषेधमें ही यदि श्रुतिको तात्पर्य होय तो गीतामें ''अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा'' (भग.गीता७।६) या श्लोकमें ब्रह्ममें जगत्को कर्तापणो वर्णन कियो हे तासों विरोध आवेगो. तासों ब्रह्मकी महिमा जतायवेके अर्थ ब्रह्मकुं अकर्ता बतायो हे. जेसे पुरुषसूक्तमें ''पुरुषएवेदं सर्वम्'' (ऋग्वेद:१०।९०।२) ''उतामृतत्वस्ये-शानः'' (तत्रैव) ''एवतावानस्य महिमा'' (तत्रैव१०।९०।३) अर्थ:ब्रह्म सर्वरूप हे. अमृतको भी ईशान हे. या मन्त्रमें ब्रह्मकुं सब जगत्को स्वामी बतायकें जगत्कुं भी ब्रह्मरूप ही बतायो हे. आगे लिख्यो हे के ''ब्रह्मकी महिमा हे जो अपने स्वरूपको ही आप स्वामी हो जावे हे''. यद्यपि लोकमें अपने शरीरको आप मालिक होय वा पुरुषकी महिमा नहीं होय हे अन्यन्को मालिक होय ताहीकी महिमा होवे हे तथापि ब्रह्ममें लोकविरुद्ध धर्म ही महिमा जतायवे वारो हे.

परस्पर विरुद्धधर्म जा पदार्थमें वेदनें जताये होंय वो पदार्थ ही बडो समुझनो तथा दोनों प्रकारके धर्मन्कुं भी सत्य ही समुझनो. जेसे ''समो मशकेन समो नागेन'' या वाक्यमें ब्रह्मकुं हाथीके तथा मच्छरके समान लिख्यो हे. तहां लोकमें मच्छरके समान पदार्थ हाथीके समान नहीं होय सके हे एसे तर्क करिके हाथीके समान ब्रह्मकुं बतायवे वारे वाक्यकुं मिथ्या नहीं माननो. एकवाक्यकुं यदि मिथ्या मानलियो जाय तो ब्रह्मको माहात्म्य नहीं सिद्ध होय. नट जेसे मन्त्र-औषधादिक करिके नाहर तथा हाथी बन जावे हे तेसे ब्रह्म स्वभाव करिकें ही छोटो-बडो, चल-अचल, कर्ता-अकर्ता आदिरूप हो जाय हे।।८८।।

पुराणन्तु मित्रसम्मतमिति लोकरीत्या बोधयन् कदाचिन् मायिकत्वं बोधयति इति आह मायिकत्वं पुराणेषु इति.

मायिकत्वं पुराणेषु वैराग्यार्थम् उदीर्यते।।
तस्माद् अविद्यामात्रत्वकथनं मोहनाय हि।।८९।।

आसक्तिनिवृत्त्यर्थं तथा बोध्यते, अवान्तरप्रकरणानुरोधात् च तथा अवसीयते. उपसंहरति तस्माद् इति।।८९।।

पुराणन्में प्रपञ्चके मायिकत्वके प्रतिपादक जो वाक्य उपलब्ध होंय हें वाको प्रयोजन जनावे हें के पुराण मित्र समान उपदेश करिवेवारो हे, अत: लौकिक रीतिसुं समुझाते भये पुराणन्में कहुं-कहुं जगत्कुं जो मिथ्या बतायो हे सो आसक्ति दूर करिवेके अर्थ बतायोहे. जेसें कोई पुरुषनें अपने मित्रसों कही ''हे मित्र विष खानो उचित हे परन्तु शत्रुके घर भोजन करनों योग्य नहीं'' या वाक्यको शत्रुके घर भोजन नहीं करायवेमें तात्पर्य हे, विष खवायवेमें तात्पर्य नहीं हे, एसें ही विषयतारूप अन्तरा सृष्टिकुं मिथ्यात्व कहिकें आसक्ति दूर करायकें वैराग्य सिद्ध करिवेमें पुराणन्को तात्पर्य हे, सत्यब्रह्मात्मक जगत्कुं मिथ्या बता-यवेमें पुराणन्को तात्पर्य सर्वथा नहि हे. जगत्कुं मिथ्या कहिवेमें ही यदि पुराणन्को तात्पर्य होय तो भागवतमें ''विश्वं वै ब्रह्म

तन्मात्रम्'' तथा विष्णुपराणमें ''तदेतदक्षयं नित्यं जगन्मुनिवराखिलम्'' इत्यादि अनेक स्थलन्में जगत्कुं सत्यरूपता तथा ब्रह्मात्मकता नहीं लिखते. तासों अवतार प्रकरणके अनुसार वेसे वचनन्कों वेराग्य बोधनार्थ समुझ लेनों. याको विस्तार 'आवरणभङ्ग'में या श्लोकव्याख्यानमें बहुत कियोहे।।८९।।

अस्मिन् अर्थे भगवद्वाक्यं सम्मतिरूपम् आह असत्यमप्रतिष्ठं तेइति.

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।।
अपरस्परसम्भूतं किमन्यत् कामहेतुकम्।।९०।।

अतो यत्र क्वचित् जगतो मिथ्यात्वम् असत्यत्वं मायिकत्वम् इति बोध्यते तद् आसुरम् इति निश्चयः।।९०।।

तासों प्रकरणके अनुसन्धान राखे विना जगत्कुं अविद्यारूप कहेनो प्रतारणा करनो हे. श्रीआचार्यजी आज्ञा करे हें के हमारे सिद्धान्तमें भगवान्के वाक्यकी सम्मति हे. गीतामें ''असत्यमप्रतिष्ठम्'' (भग.गीता१६।८) या श्लोकमें जगत्कुं मिथ्यामायिक-असत्य बतायवे वारेन्कुं आसुर कहे हें.

श्लोकार्थ:वे आसुर लोग जगत्कुं असत्य, अप्रतिष्ठित तथा अनीश्वर अर्थात् ईश्वररहित बतावे हें. वे जगत्कुं स्त्री-पुरुषके संसर्गसों उत्पन्न भयो माने हें. तथा उनके मतमें जगत्की उत्पत्तिको हेतु काम ही हे ईश्वर नहीं ।।९०।।

ननु ब्रह्मवादेऽपि 'वाचारम्भण'वाक्यानुरोधाद् विकल्पानाम् असत्यत्वम् अङ्गीकर्तव्यम् इति आशङ्क्य आह अखण्डाद्वैतभाने तु इति.

अखण्डाद्वैतभाने तु सर्वं ब्रह्मैव नान्यथा।।
ज्ञानाद् विकल्पबुद्धिस्तु बाध्यते न स्वरूपतः।।९१।।

द्वेधा हि वेदान्तानां बोधन प्रकारः. ''प्रजायेय'' (तैत्ति.उप.२।६) इतिवाक्यानुरोधाद् उच्च-नीचत्वं भगवानेव प्राप्तः इति विकल्पबुद्धावपि ब्रह्मावगतिः न विरुद्ध्यते. क्वचित्पुनः विकाराः वाचैव आरब्धाइति कार्यांशम् अनादृत्य वस्तुस्वरूपविचारेण आविर्भावतिरोभावौ पृथक्कृत्य ''सन्मात्रं जगद्'' इति बोधयन्ति. तत्र प्रथमपक्षे सन्देहएव नास्ति, द्वितीयपक्षेऽपि न दूषणमिति 'तु'शद्बः. यदा अखण्डाद्वैतभानं सुवर्णग्राहकवत् सत्वेनैव सर्वं गृह्णाति तदा अवान्तरविकल्पविषयिणी बुद्धिः 'घटः'-'पटः' इति सा बाध्यते. सर्वत्र ब्रह्मैव इति बुद्धिः भवति. नतु स्वरूपतोऽपि घटादिपदार्थोऽपि धर्मी बाध्यते इति अर्थः।।९१।।

शङ्का:'वाचारम्भण' श्रुति करिके जगत्में ब्रह्मबुद्धिकुं सत्यता आवे हे तथापि घट-पटादिक विकल्पकुं तो मिथ्यापणो प्राप्त होवे ही हे.

उत्तर:वेदान्तमें ज्ञान करायवेके दो प्रकार लिखे हें मुख्याधिकारीन्के अर्थ सखण्डाद्वैत को प्रथम पक्ष हे. तामें ब्रह्मासों लेकें घास पर्यन्त जितनें हु पदार्थ हें उनमें उच्च-नीचत्वकों भगवान् ही प्राप्त हो रहे हें. अर्थात् भगवान् ही घट-पटादि पदार्थरूप हें. या रीतिकी विकल्पबुद्धि भी ब्रह्मज्ञान् सों विरुद्ध नहीं हे. तथा अन्य अधिकारीन्के अर्थ दूसरो पक्ष हे. तामें ''ये घट हे''-''ये पट हे'' एसी विकल्प बुद्धिको अनादर करिकें सब ब्रह्म हे एसी बुद्धि राखनी चहिये. जेसें सुवर्णको लेवेवारो ''ये कुण्डल हे''-''ये कडा हे'' एसी बुद्धिकों छोडिके सबन्कुं सुवर्ण मानके ही ले जावे हे एसें ही अखण्डाद्वैतको ज्ञान सुवर्णग्राहकके समान हे. जब सब पदार्थन्कुं सद्रूप ही माने हे तब ''ये घट हे''-''ये पट हे'' एसी बुद्धिको बाध हो जावे हे. सब ठिकाने ब्रह्म हे एसी बुद्धि हो जावे हे. या पक्षमें भी सर्वत्र ब्रह्मबुद्धि हो जावे हे तब ''ये घट''-''ये पट'' एसी बुद्धि ही मिट जावे हे तथापि घट-पटादि पदार्थ नहीं मिटे हें. तासों या रीतसों भी जगत् मिथ्या नहीं हो सके हे.

श्लोकार्थ:अखण्डाद्वैतकी अनुभूति होयवे पर तो सम्पूर्ण भेद सहित प्रपञ्च ब्रह्मके रुपमें ही प्रतीत होवे हे. अर्थात् ब्रह्मत्वेन ही गृहीत होवे हे, अन्यथा नहीं, अर्थात् वा स्थितिमें भेदको ज्ञान नहीं होय हे. ब्रह्मज्ञान होयवे पर विकल्पबुद्धि अर्थात् भेदबुद्धिको बाध होय हे किन्तु प्रपञ्च स्वरुपत: बाधित नहीं होय हे अर्थात् प्रपञ्चके घट-पटादि स्वरुपको बाध नहीं होय हे।।९१।।

ननु घट-पटयो: द्वैतं न उपपद्यतइति प्रत्यक्षानुरोधाद् द्वैतम् अङ्गीकर्तव्यम् इति आशङ्क्य आह भिन्नत्वम् इति.

भिन्नत्वं नैव युज्येत ब्रह्मोपादानतः क्वचित्।।
वाचारम्भणमात्रत्वाद् भेदः केनोपजायते।।९२।।

कटक-कुण्डलयो: भेदो न सर्वथा भवति, उपादानस्य एकत्वात्. धर्मरुपत्वे एकस्यैव उभयं धर्मः. तयोश्च उपादानाभेदाद् भेदो न युक्तिसहः. प्रत्यक्षन्तु अभेदेपि भेदं गृह्णाति, द्विचन्द्रादिवत्. महतान्तु प्रत्यक्षं तदपि न गृह्णाति. अतः प्रमाणानुरोधाद् वाचारम्भणमात्रत्वं पदार्थानाम् अवगत्य सर्वत्र ब्रह्माभावावगतौ केन भेद: उपजायते इति अर्थः. तस्माद् भेदानुरोधेनापि ब्रह्मवादो न निराकर्तव्य: इति भावः।।९२।।

कितनेक मतवारे घडा वस्त्र आदि पदार्थन्कुं न्यारे-न्यारे देखिकें प्रत्यक्षके अनुसार घट-पटादि पदार्थन्को भेद माने हें सो भी ठीक नहीं हे. जेसें सुवर्णके बने भये कडा, कुण्डल आदि पदार्थन्में भेद नहीं होवे हे, क्योंके दोनोंको (कारण) अर्थात् बनायवेवारो एक ही पदार्थ हे एसें ही जगत्के पदार्थन्में भी भेद नहीं हे, क्योंके सब पदार्थन्को बनायवेवारो उपादानकारण ब्रह्म एक ही हे.

घट-पटादि पदार्थन्कुं धर्मरुप माने जांय तो भी एक ब्रह्मके ही दोनों धर्म भये. या पक्षमें भी उपादान-ब्रह्मके साथ अभेद हे. तासों भेद माननों युक्ति विरुद्ध हे. प्रत्यक्ष देखिवेसों तो भेद अभेदको निश्चय नहीं होय सके हे. कभी एक चन्द्रमाके भी दो चन्द्रमा दीख आवे हें. घटाकाश-महाकाशको भेद नहीं हे.

लोकमें देहसों न्यारो आत्मा भी नहीं दीखे हे तासों महात्मानको ही प्रत्यक्ष ज्ञान प्रमाण हे. उनकुं तो सर्वत्र अभेद ही प्रतीत होवे हे तासों ‘प्रजायेय’ तथा ‘वाचारम्भण’ वाक्यके अनुसार सब ठिकानें ब्रह्मबुद्धि भये पीछे भेद करिवे वारो कोई भी पदार्थ बाकी नहीं रहे जो भेद करि सके. तासों भ्रमयुक्त लौकिक भेदप्रतीति केवलसों ब्रह्मवादको खण्डन नहीं करनो।।९२।।

एवं मायावादं निराकृत्य साङ्ख्यनिराकारणार्थम् आह साङ्ख्यो बहुविध: इति.

साङ्ख्यो बहुविधः प्रोक्त: तत्रैकः सत्प्रमाणकः।।
अष्टाविंशतितत्वानां स्वरुपं यत्र वै हरिः।।९३।।

ब्रह्मवादएव प्रथमसृष्टानां पदार्थानां साङ्ख्य-योगात् साङ्ख्यम् इति यन् मतं तद् ब्रह्मवादएव प्रविशति. स्वतन्त्रतया यानि मतानि तानि अप्रामाणिकानि तत्र एकं स्थापयति तत्रैक: इति. सतां प्रमाणसिद्धः. तस्य स्वरुपम् आह अष्टाविं-शति इति।।९३।।

या प्रकार मायावादको निराकरण करिके अब सांख्यमतके निराकरणार्थ आगेकी कारिका कहि रहे हें.

सृष्टिके प्रारम्भमें उत्पन्न भये पदार्थन्की प्रामाणिक गणना तथा उनको सम्यक् विवेचन ब्रह्मवादमें ही भयो हे अत: ‘साङ्ख्य’नामसुं प्रसिद्ध सिद्धान्तको ब्रह्मवादमें ही समावेश हे. श्रुतिसिद्धान्तसों स्वतन्त्र रीतिसों बनाये भये जे साङ्ख्यमत हें वे प्रमाण नहीं माने जावे हें. अर्थात् भागवतके द्वितीय-तृतीय तथा एकादश स्कन्धमें लिख्यो जो साङ्ख्य सिद्धान्त हे वाकु प्रमाण माननो. वो ही मनुआदि महर्षिगणनें प्रमाण मान्यो हे।।९३।।

अन्येषां दूषणप्रकारम् आह अन्ये इति.

अन्ये सूत्रे निषिध्यन्ते योगोऽप्येकः सदादृतः।।
यस्मिन् ध्यानं भगवतो निर्बीजेऽप्यात्मबोधकः।।९४।।

अन्येषां च अनुपलब्धेः. न हि महत्तत्वं प्रकृतिर्वा जगति प्रतीयते. नित्या वा प्रकृतिः निरवयवा च कथं परिणमति. अतः स्वभाववादएव प्रकृतिवादोऽपि प्रविशति इति. अन्यत् दूषणं भाष्ये विस्तरेण उक्तम्.

योगं निराकरोति योगोऽप्येकः इति. चित्तवृत्तिनिरोधो योगः, स च भगवद्ध्यानार्थम् अङ्गत्वेन उपयुज्यते, स प्रामाणिकः. यस्तु स्वतन्त्रतया फलसाधकत्वेन प्रोक्तः, तथा सिद्धिहेतुः ज्ञानात्मा च, तथा अन्ये देहेन्द्रियादिसाधकाः ते अप्रमाणिकाः. सूत्रे च निषिद्ध्यन्ते ''एतेन योगः प्रत्युक्तः'' (ब्रह्मसूत्र२।१।३) इति. तदाह यस्मिन् ध्यानं भगवतः इति. ''अन्ये सूत्रे निषिध्यन्ते'' इति अनुषङ्गः. ध्यानाभावेऽपि आत्मबोधाङ्गभूतः प्रामाणिकएव।।९४।।

निरीश्वर कापिल सांख्य आदि मतन्में प्रकृति, महत् आदि तत्व जा रूपमें स्वीकृत भये हें वा रूपमें उनकी उपलब्धि लोक-वेदमें नहीं होय हे अतः वो सांख्यमत सिद्धान्तमें स्वीकार्य नहीं हे. प्रकृति नित्य तथा निरवयव हे अतः वाको परिणमन हो ही नहीं सके हे. या प्रकारसों प्रकृतिपरिणामवाद मानिवे वारे सांख्यमतको पर्यवसान अथवा अन्तर्भाव अन्ततः स्वभाववादमें ही होवे हे. सांख्यमें रहे भये अन्य दूषण भाष्यमें ही विस्तार पूर्वक लिखे हें.

एसें ही योगशास्त्र भी वोही प्रमाण हे जो पुराणोक्त हे. योग चित्तकी वृत्ति रोकवेको नाम हे. भगवान्को ध्यान चित्त रुके विना नहीं हो सके हे तासों एसो योग भगवद्ध्यानको साधक हे तासों भक्तिको अङ्ग हे. जो योग भक्ति विना हि स्वतन्त्र होयकें फल देवेवारो हे वो प्रमाण नहीं हे, वाकुं लौकिक सिद्धि देयकें वृथा काल खोयवे वारो समुझनो. वा योगकुं पुराणादिकन्में भी तुच्छमान्यो हे. ज्ञानात्मादिक योग कापालिकमतमें तथा वाममार्गमें लिखे हें वे भी प्रामाणिक नहि हें. एसे ही देहेन्द्रियादिकन्कुं दृढ करिवेवारे जो जोग हें उनकुं वृथा काल खायवेवारे जानिके अप्रामाणिक मानने. उन ही योगन्को ''अनेन योगः प्रत्युक्तः'' (ब्रह्मसूत्र२।१।३) या व्याससूत्रमें खण्डन कियो हे.

योग वो ही प्रमाण हे जामें भगवान्को ध्यान लिख्यो होय. जा योगमें ध्यान नहीं लिख्यो होय वाकुं केवल आत्मज्ञानको अङ्ग समुझनो, वाकुं वा ही विषयमें प्रमाण समुझनो।।९४।।

उपसंहार

एवं परमतनिराकरणपूर्वकं स्वमतं स्थापयित्वा निरूपितस्य भक्त्युपयोगम् आह वैराग्य इति.

वैराग्यज्ञानयोगश्च प्रेम्णा च तपसा तथा।।

एकेनापि दृढेनेशं भजन् सिद्धिमवाप्नुयात्।।९५।।

पञ्चाङ्गयुक्तः पुरुषो भगवन्तं भजेत्. तत्र प्रथमं वेराग्यम् अङ्गम्, तदभावे भगवदावेशाभावात् न भजनसिद्धिः. द्वितीयं ज्ञानं सर्वपदार्थनां याथार्थ्यरूपं भगवतश्च, तदभावे निश्चयाभावात् न प्रवृत्तिः. योगोऽपि अङ्गम्, मनसः चाञ्चल्ये भजनानुपपत्तेः. तथा प्रेमापि अङ्गं, तदभावे भजनं स्वतःपुरुषार्थरूपं न भवेत्. रसाभिव्यक्त्यभावात्. तपोऽपि अङ्गं, तदभावे देहादेः आत्मत्वात् न भजनं सिद्ध्यति, तपसा च देहेन्द्रियादीनां पाकः.

पञ्चानां समुदायो दुर्लभइति गौणपक्षम् आह एकेनापि इति. 'दृढेन' इति विशेषः. ईशं समर्थं कृष्णम्. सिद्धिं मोक्षम्।।९५।।

इतने ग्रन्थ करिके परमतको निराकरण कियो तथा स्वमतको वेदादिके अनुसार स्थापन कियो. अब या मतको भक्ति-मार्गमें उपयोग दिखावेहें.

पांच साधन सहित पुरुषकों भगवान्‌को भजन करनो चहिये. प्रथम तो १वैराग्य अर्थात् विषयभोगकी तृष्णाकुं छोडनो चहिये, क्योंके जहां तांई विषयभोगकी इच्छा नहिं मिटे हे तहां तांई भगवान्‌को आवेश नहिं आवे हे, ओर भगवान्‌को आवेश आये विना भगवद्भजन नहिं सिद्ध होय हे. दूसरो साधन २ज्ञान, अर्थात् जा पदार्थको जेसो स्वरूप हे वेसो ही स्वरूप वा पदा-र्थको जान लेनो, तथा भगवान्‌को भी शास्त्ररीतिसों यथार्थ स्वरूप जान लेनो, याको नाम 'ज्ञान' हे. या विना भगवद्भजन्‌में प्रवृत्ति हु नहिं होय. तीसरो साधन ३योग हे, अर्थात् चित्तके रोकिवेको नाम 'योग' हे. चित्तके रुके विना भगवद्भजन बन नहिं सके हे. चतुर्थ साधन ४प्रेम हे. प्रेम विना भगवद्भजन्‌में रस नहिं प्रकट होवे हे, रस आये विना भगवद्भजन्‌कुं मुख्य फलरूप नहिं माने हे. तहां तांई अन्य फलकी कामना करिके करी गई भक्ति स्वतः पुरुषार्थरूप स्वतन्त्र नहीं कहावे हे. भगवद्भजनको ५.तप पांचवो साधन हे. तप विना देहेन्द्रियादिक कच्चे रहे हें. तप करकें ही देह-इन्द्रिय आदि पक जावे हें. जब देहेन्द्रियादिक पक्के होंय तब हि भगवद्भक्ति बन सके हे.

परन्तु इन पांच साधनन्‌को सिद्ध होनो बहुत दुर्लभ हे. तासों मुख्य रीतिसों भजन नहिं बन सके तो गौण रीतिसों ही करनो. इन कहे पांच साधनन्‌मेंसों एक साधनकुं भी दृढ करिके वासों सर्वसमर्थ श्रीकृष्णको भजन कियो जाय तो मोक्ष होवे हे।।९५।।

एवम् उत्पत्तिप्रकारेण परमतनिराकरणपूर्वकं स्वमतं स्थापयित्वा काल-द्रव्य-गुणैः त्रेधैव प्रलयः इति प्रलय-प्रकारेणापि परमतं निराकर्तुम् आह ज्ञाने लयप्रकारा हि इति.

ज्ञाने लयप्रकारा हि जगतो बहुधोदिताः।।

मनसः शुद्धिसिद्ध्यर्थम् एकः साङ्ख्यानुलोमतः।।९६।।

ज्ञानमार्गे जगतो लयप्रकारा बहवः उक्ताइति ते सर्वे प्रकरणाभावात् मनसः शुद्ध्यर्थं ज्ञेयाः, यतः त्रिविधएव सङ्क्रमः, कालेन नित्यः. द्रव्येण सङ्कर्षणमुखाग्निना नैमित्तिकः, गुणैः प्राकृतिकः. तएव प्रकारान्तरम् आपन्नाः भाव-नया साधिता आत्यन्तिकशब्दवाच्या भवन्ति. नतु आत्यन्तिको अतिरिक्तः, अहन्ता-ममतानाशएव विषयाणां नाशोप-चारात्. ततो अतिरिक्तकल्पनायां प्रमाणाभावः. भावनया फलं भवतीति तदाह मनसः शुद्धिसिद्ध्यर्थम् इति. ''एकः साङ्ख्यानुलोमतः'' इति, ''अन्ने प्रलीयते मर्त्यः'' (भाग.पुरा.११।२४।२२) इत्यादिना निरूपितः।।९६।।

कितनेक मनुष्य ''ज्ञानसों जगत्को लय होवे हे'' या रीतिके अनेक वाक्य सुनिकें जगत्कुं अज्ञानरूप मान लेवे हें या सन्देहकुं दूर करिवेके अर्थ लयको स्वरूप दिखावे हें.

चित्त शुद्ध होयवेके अर्थ शास्त्रमें जगत्के लय होयवेके अनेक प्रकार कहे हें. मुख्य तीन प्रकार हें. एक नित्यप्रलय हे. काल करिके नित्य-नित्य सर्व पदार्थन्को लय होवे हे, जेसें दियाकी ज्योतिको उपरसों लय होतो जावे हे ओर भीतरसों दूसरी निकसती जावे हे. देखिवे वारेकुं एक ही ज्योति प्रतीत होवे हे. एसें ही सब पदार्थको नित्य प्रलय होवे हे, अस्मदादिकन्कुं प्रतीत नहिं होवे हे. दूसरो नैमित्तिक प्रलय हे. ये प्रलय द्रव्य करके होवे हे. जेसें दण्डके प्रहारसों घडाको लय हो जावे हे. तीसरो प्राकृतिक प्रलय हे. ये प्रलय गुणन् करिके होवे हे. ब्रह्माकी आयुष्य पूरी भयेसों सब सृष्टिको लय होवे हे. ता समयमें क्षोभित गुणन्को भी नाश हो जावे हे. इन प्रलयन्कुं भावना करिके सिद्ध कर लेनो येही आत्यन्तिक प्रलय हे. यद्यपि भावना करिके करे भये प्रलयमें जगत्के पदार्थन्को नाश नहिं होवे हे परन्तु भावना करिके उन पदार्थन्को प्रलय भयो समुझवेसों अहन्ता-ममताको नाश हो जावे हे वाहीसों विषयन्को नाश अथवा आत्यन्तिक प्रलय कहे हें. इन तीन प्रकार विना केवल ज्ञान करिके जगत्को नाश माननों प्रमाण विरुद्ध हे. वेसी कल्पनासों कछु फल भी नहिं होवे हे.

साङ्ख्यशास्त्रोक्त लयकी भावना करिवेको प्रकार एकादाश स्कन्धके चतुर्विंशाध्यायमें लिख्यो हे:अन्नमें शरीरके लयकी भावना, अन्नको धानामें लय, धानाको भूमिमें, भूमिको गन्धमें, गन्धको जलमें, जलको रसमें, रसको ज्योतिमें, ज्योतिको रूपमें, रूपको वायुमें, वायुको स्पर्शमें, स्पर्शको आकाशमें-या प्रकार परमेश्वरमें सब पदार्थन्के प्रलयकी भावना लिखी हे. आगेके श्लोकमें ''एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः, मनसो हृदि तिष्ठेत'' (भाग.पुरा.११।२४।२८) अर्थ:एसी भावना करिवे वारेके हृदयमें आत्माध्यासरूप अहङ्कारात्मक भ्रम नहिं रहे हे ये ही फल लिख्यो हे. देहनाश अथवा जगत्को नाश होनो फल नहिं लिख्यो हे. एसो ही होय तो भावना करिवे वारेको वाही समय देहनाश हो जानो चहिये. प्राकृतिक प्रल-यकी भावनाको नाम प्राकृतिक आत्यन्तिक लय हे. नित्य प्रलयकी भावनाको नाम नित्य-आत्यन्तिक लय हे. नैमित्तिक प्रल-यकी भावनाको नाम नैमित्तिक-आत्यन्ति लय हे।।९६।।

प्रकारान्तरम् आह इन्द्रियाणाम् इति.

इन्द्रियाणां देवतात्वं भावनाप्रापणे तथा।।
गोविन्दासन्यसेवातः प्रापणं नान्यथा भवेत्।।९७।।

''वाचमग्नौ सवक्तव्यम्'' (भाग.पुरा.७।१२।२६) इत्यादिना प्रापणेन तदंशमात्रलयो भिन्नो भवतीति तत्प्र-कारम् आह गोविन्दासन्यसेवात: इति. अयं लयो रूपान्तरापादकः कार्यरूपः उत्पत्तिरेव न लय: इति भावः।।९७।।

लयभावनाके एक अन्य प्रकारको निरूपण करे हें.

श्लोकार्थ:या ही प्रकार देवत्वभावनासों देवभावको प्राप्त होयवे पर इन्द्रियन्को लय होवे हे. गोविन्दकी सेवा अथवा आसन्य-प्राणकी उपासनासों इन्द्रियन्कुं देवतात्व प्राप्त होवे हे. इन्द्रियन्कुं देवतात्वकी प्राप्ति अन्य कोई प्रकारसुं नहीं हो सके हे.

लयभावनाको एक प्रकार सप्तम स्कन्धमें लिख्यो हे. तहां वाक्यन् सहित वाणीको अग्निमें न्यास करनो, शिल्प सहित हस्तको इन्द्रमें न्यास करनो कह्यो हे. या रीतिसों इन्द्रियन्को तत्वन्को लय दिखायो हे सो भी यतिधर्ममें वैराग्य होयवेके अर्थ दिखायो हे, कछु वो सृष्टिप्रकरण नहिं हे. पहिलो या ग्रन्थमें देह-सङ्घातके लयको प्रकार दिखायो हे, वो भी लय मनकी भावनामात्रसों नहिं होय हे किन्तु आसन्यकी अथवा गोविन्दकी सेवा करिके इन्द्रियन्में देवभाव होवे तब देवांशको लय होय, तब देहको लय होवे हे. ये लय रूपान्तर, अर्थात् दूसरेरूपकुं सिद्ध कर देवे वारो हे।।९७।।

प्रकारान्तरम् आह अद्वय इति.

अद्वयात्मदृढज्ञानाद् वैराग्यं गृहमोचकम्।।
वागादिविलयाः सर्वे तदर्थं मन आदिषु।।९८।।

''वाचं जुहाव मनसि'' (भाग.पुरा.१।१५।४१) इत्यादिना सङ्घातस्य लयभावनया अद्वयात्मदृढज्ञानं भवति, तस्य वैराग्यहेतुत्वम्. रागाभावस्य च सन्न्यासोपयोगः. अतएव न कारणे लयः उक्तः।।९८।।

श्लोकार्थ:अद्वयात्माके दृढ ज्ञानसों गृहमोचक अर्थात् गृहत्याग करायवे वारो वैराग्य होवे हे. मन आदिमें वागादि इन्द्रियन्के विलयकी भावना करिवेको प्रतिपादन वाही वैराग्यके अर्थ कियो हे.

जेसें कीडा भृङ्गीकी भावना करते-करते भृङ्गी होवे हे या न्यायसों भावनासों पहिले रूपको तो त्याग नहिं होय अपितु वाही पदार्थको अन्य रूप होय जाय—ये उत्पत्तिको ही प्रकार हे, ये लय नहिं हे. एसें ही राजा युधिष्ठिरने भी सङ्घातके लयकी भावना करी हे तहां वाणी, मन, प्राण आदि नव अग्निमें नव आहुतिन् करिके कल्पना मात्रसों होम कियो. या होममें अपने नियामकन्में होमकी भावना करी जावे हे, जेसें वाणीको होम मनमें कियो जावे हे, क्योंके वाणी मनके आधीन हे. मनको होम प्राणमें कियो जावे हे, क्योंके ''प्राणबन्धनं हि सोम्य मनः'' (छान्दो.उप.६।८।२) या श्रुतिमें मनकुं प्राणके आधीन लिख्यो हे. इत्यादि प्रकारको भी अद्वयज्ञान दृढ होवे हे, वासों वैराग्यको सन्यासमें उपयोग हे. राजाने सन्न्यासकी सिद्धिके अर्थ ही एसी भावना करी हती यासों ये निश्चय भयो।।९८।।

एवं लयत्रयम् उक्त्वा प्रकृतोपयोगम् आह भावनामात्रतः इति.

भावनामात्रतो भाव्या न हि सर्वात्मना लयः।।
मनोमात्रत्वकथनं तदर्थं जगतः क्वचित्।।९९।।

सर्वात्मना कालादिनेव न लयः. ''देहं मनोमात्रमिमं गृहीत्वा'' (भाग.पुरा.११।२३।५०) इत्यादिवाक्यानां बाधकत्वम् आशङ्क्य तेषामपि वैराग्योपयोगित्वम् इति आह मनोमात्रत्वकथनम् इति।।९९।।

उपर्युक्त तीनों लय भावनामात्रसों वैराग्यकी सिद्धिके अर्थ करने योग्य हैं. काल आदि द्वारा प्रपञ्चको जा प्रकार लय होवे हे वा प्रकारको प्रपञ्चको लय इनकुं नहीं समुझनो. कहुं-कहुं वैराग्य, मनःशुद्धि आदिके सिद्ध्यर्थ जगत् वा देहादि के मनोमात्रत्वको प्रतिपादन भयो हे.

जितने लयके प्रकार हैं भावनामात्र करिके भाव्य हैं. देहादिकन्को लय करिव वारे नहिं हे. एसें ही जहां देहादिकन्कुं मनोमात्रता लिखी हे वो भी वैराग्य होयवेके अर्थ ही लिखी हे. वेसें भिक्षुगीतामें वैराग्य प्रकरणमें ''देहं मनोमात्र मिमम्'' (भाग.पुरा.११।२३।५०) या श्लोकमें लिखी हे।।९९।।

एवं मतान्तराणि निराकृत्य तेषां फलाभावं वक्तुं येनकेनापि मार्गेण भगवद्भजनं चेत् फलाय भवेत् तदा न एकान्ततः स्वमतं साधकं भवति इति मार्गन्तरवर्तिनां भगवद्भजनेऽपि फलाभावम् आह भक्तिमार्गानुसारेण इति सार्द्धेन.

भक्तिमार्गानुसारेण मतान्तरगता नराः।।
भजन्ति बोधयन्त्येवम् अविरुद्धं न बाध्यते।।
नैकान्तिकं फलं तेषां विरुद्धाचरणात् क्वचित्।।१००।।

नहि मायावादादिमते श्रीकृष्णादिः व्यवहारत्वाद् ब्रह्म भवितुम् अर्हति. ते तु सदानन्द-चित्स्वरूपम् इति चाहुः. अतः स्वमते यथा तथा पदार्थसिद्ध्यभावात् चेद् भक्तिमार्गानुसारेणैव वदन्ति इति ज्ञातव्यम्, तदा तेषां प्रतितन्त्रन्यायाभ्युपगमसिद्धान्तो भवति. तावता तेषां फलं भविष्यति इति आशङ्क्य आह नैकान्तिकम् इति. कस्यचिद्

भक्तेरेव अतिशये नाममात्रेण मायावादित्वे बिल्वमङ्गलादीनामिव मोक्षो भवेदपि, नतु स्वमतपक्षपाते, अतो नैकान्तिकं फलम्. तत्र हेतुः, विरुद्धाचरणाद् इति. भगवति कदाचिद् अन्यथाभावनया स्वाज्ञानकल्पितत्वादिना।।१००।।

एसें मतान्तरको निराकरण करिके भक्तिमार्गकी रीतिसों भगवद्भजन करे हें उनकुं ही फल मिले हे. अन्य मार्गवर्ती होयकें भजन करे तो फल नहिं होय हे ये आज्ञा करे हें. ''भक्तिमार्गानुसारेण'' इति.

श्लोकार्थ:अन्य मतन्को अनुसरण अथवा अवलम्बन करिवे वारे लोग यदि भक्तिमार्गानुसार भगवान्को भजन करे हें तथा तदनुसार ही पदार्थन्को बोध करावे हें तो उनको या प्रकारको अविरुद्ध भजन बाधित नहीं होय हे, किन्तु उन लोगन्कुं भक्ति-मार्गसों विरुद्ध आचरण करिवेके कारण ऐकान्तिक फल अर्थात् मोक्ष प्राप्त नहीं होवे हे.

मायावादादि मतमें ब्रह्मकुं व्यवहारके योग्य नहिं माने हें ओर श्रीकृष्णकुं व्यवहारके योग्य माने हें तासों उनकी रीतिसों श्रीकृष्ण ब्रह्म ही नहिं होय सकें हे.

कदाचित् कहोगे के उनके मतमें सदानन्द-चित्स्वरूपकुं ब्रह्म कहे हें, तो वे भी भक्तिमार्गानुसार ही कहि रहे हें एस ही जाननो चहिये, क्योंके जा शास्त्रको जो अङ्गीकार कर लेवे हे वो पुरुष वा शास्त्रके मतकुं ही अपनो मुख्य सिद्धान्त माने हे. तथा 'अन्धहस्ति'न्याय करिकें एक-एक शास्त्र ईश्वरके एक देशको प्रतिपादन करिवे वारे हें तासों वा मत करिकें फल भी अवश्य होयगो.

तहां उत्तर देत हें. मायावादीके मतमें मोक्ष कोई पुरुषको होवे तो भी मायावाद भगवद्भजनको साधक नहिं हो सके हे. जेसें बिल्वमङ्गल जो पूर्वावस्थामें विरुद्धाचरण वाले भी हते परन्तु पीछें प्रबल भक्ति करिकें मोक्षकों प्राप्त भये एसें प्रबल भक्ति होय तो नाम मात्रको मायावादी भी होय तो भी मोक्ष हो जाय. यदि मायावादको पक्षपात नहिं करें तो, क्योंके मायावादकी रीतिसों भगवान्में विपरीत भावना करिकें अज्ञानकी कल्पित बुद्धि हो जाय तो भक्ति सर्वथा सिद्ध नहिं होय. यासों मायावादादि मतमें भक्तिविरुद्ध आचार होयवेसों फलप्राप्तिको निश्चय नहिं होय सके हे ये बात सिद्ध भई।।१००।।

एवं परमतं निराकृत्य, स्वमते यथा भजनं तथा सङ्कलीकृत्य आह एवं सर्वम् इति.

एवं सर्वं ततः सर्वं स इति ज्ञानयोगतः।।
यः सेवते हरिं प्रेम्णा श्रवणादिभिरुत्तमः।।१०१।।

एवं सर्वं निश्चित्य, सर्वं भगवतएव, सएव च सर्वम् इति वैदिक-गौणमुख्यज्ञानयुक्तः, प्रेम्णा श्रवणादिप्रकारेण यः भजते स भक्तिमार्गे उत्तमः।।१०१।।

श्रीआचार्यजी आज्ञा करे हें जो या ग्रन्थमें ज्ञान वर्णन कियो ताको निश्चय करिकें, अर्थात् सब जगत् भगवान् सों ही प्रकट भयो हे तथा भगवान ही सर्वरूप हें एसें गौण-मुख्य भावसों भगवान्को माहात्म्य जानिकें, चित्तके वैराग्यद्वारा विषयभो-गकी आसक्ति छोडिकें, योगके द्वारा चित्तकों एकाग्र करिके, तपश्चर्याके द्वारा देहेन्द्रियादिकन्कुं पक्के करिके उत्कट प्रेमसों प्रकट भयो जो रस वा रसके बढवेसों भक्तिको ही परम पुरुषार्थरूप मानिकें श्रवण, कीर्तन, स्मरण, पादसेवन, अर्चन, वन्दन, दास्य, सख्य तथा आत्मसमर्पण रूप नव प्रकार करिकें भगवान्को भजन करे हे वो उत्तमाधिकारी हे।।१०१।।

प्रेमाभावे मध्यमः स्याज्ज्ञानाभावे तथादिमः।।
उभयोरप्यभावे तु पापनाशस्ततो भवेत्।।१०२।।

शास्त्रार्थज्ञानाभावेऽपि प्रेम्णा भजने मध्यमः. प्रेमाभावे मध्यमः इति वा. ज्ञानाभावे तथा मध्यमः इति अर्थः. आदिमो वा. उभयोः अभावे श्रवणादीनां पापनाशकत्वं धर्मत्वं वा, नतु भक्तिमार्गः इति अर्थः।।१०२।।

जो मनुष्य शास्त्रके द्वारा भगवान्के माहात्म्यकुं तो नहिं जानतो होय परन्तु उत्कट प्रेम करिकें श्रवण–कीर्तनादि नव भक्ति करिकें भगवत्सेवा करतो होय वाकुं मध्यमाधिकारी कहेनो, क्योंके माहात्म्य जानिकें वाको प्रेम भयो हे तासों वो प्रेम गौण हे. जो पुरुष शास्त्रके द्वारा भगवान्के माहात्म्यकुं जानके प्रेमविना श्रवणादि नवप्रकारन्के द्वारा भगवद्भजन करे हे वामें मुख्य अङ्ग प्रेमके नहिं होयवेसों वाकुं भी मध्यमाधिकारी कहेनों. जो पुरुष शास्त्रद्वारा भगवन्माहात्म्यकुं भी नहिं जानें हे, जामें सबसों अधिक उत्कट प्रेम भी नहिं हे, साधारण प्रेम करिके श्रवणादि नवप्रकारसों भगवद्भजन करे हे वाकुं 'आदिम', अर्थात् हीनाधिकारी कहनो. जो पुरुष ज्ञानवारो भी नहिं होय तथा प्रेमवारो भी नहिं होय, केवल श्रवणादि नव प्रकारन्सों भगवद्भजन करतो होय वा पुरुषको पापनाश मात्र होय हे, क्योंके श्रवणादिकन्कुं पानाशकता भागवत द्वितीयस्कन्धमें ''लोकस्य सद्यो विधुनोति कल्मषम्'' (भाग.पुरा.२।४।१२) या श्लोकमें लिखी हे. अथवा प्रेम–ज्ञान विना श्रवणादिककुं चान्द्रायणादिकन्के समान धर्मरूप समुझनो परन्तु माहात्म्यज्ञान पूर्वक स्नेह रहित हे तासों भक्तिमार्गीय वे नहिं होय सके हे।।१०२।।

तपोवैराग्ययोगे तु ज्ञानं तस्य फलिष्यति।।
योगयोगे तथा प्रेम स्तुतिमात्रं ततोऽन्यथा।।१०३।।

तपोवैराग्यसहितं चेत् श्रवणादिकं भवेद्, अन्यतरसहितं वा, तदा जन्मान्तरे ज्ञानं भविष्यति इति ज्ञातव्यम् ''बहूनां जन्मनामन्ते'' (भग.गीता.७।१९) इति वाक्यात्. योगसहितभजने प्रेम. प्रथमस्य मध्यमत्वं, मध्यमस्य उत्तम–त्वम् इति क्रमः. मार्गाङ्गाभावे केवलश्रवणादीनां यत् परमपुरुषार्थसाधकत्वं निरूप्यते तद् भगवतः स्तोत्रनिरूपणं, 'धन्यो अहम्'' इत्यादिवत्. प्रमेयबलेन तेषां सिद्धिः भवति चेद् भवतु, न अन्यथा इति अर्थः।।१०३।।

जो पुरुष तप–वैराग्य सहित होयकें श्रवणादि नव प्रकारसों भगवद्भजन करे हे अथवा केवल तप सहित होयकें अथवा केवल वैराग्य सहित होयकें श्रवणादि नव प्रकारसों भगवद्भजन करे हे वाके किये भये श्रवणादिकन्कुं ज्ञानमार्गीय समुझनो. विन श्रवणादिकन्सों जन्मान्तरमें ज्ञानप्राप्ति होवे हे.

जो पुरुष योगद्वारा चित्तकुं एकाग्र करिके केवल योग सहित होयकें श्रवणादिक नव भक्ति करे हे वाके श्रवणादिक भक्तिमार्गीय हें तासों विन श्रवणादिकन्सों प्रेम प्रकट होवे हे. साधन करते–करते प्रथमाधिकारी हे सो मध्यमाधिकारी हो जावे हे, मध्यमाधिकारी साधन करते–करते उत्तमाधिकारी होय जावे हे.

ज्ञानमार्गकी रीतिसों अथवा भक्तिमार्गके अनुसार करे भये ही श्रवणादिक भगवप्राप्ति साधक हें. ज्ञानमार्ग अथवा भक्तिमार्ग विना तथा तप–वैराग्य–ज्ञान–प्रेम–योगरूप पांच साधन विना केवल श्रवणादिककुं जो परमपुरुषार्थ साधक कहे हें वो भगवान्की स्तुतिमात्र हे. अर्थात् ''कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्'' इत्यादि वाक्यन्कुं भगवान्की स्तुति करिवेवारे जानने. जेसे कोई पुरुषके घर कोई महात्मा पधारे तब वो कहे हे ''में धन्य हुं, मेरे घर आप पधारे'' वाको एसे कहेनो महा–त्माकी स्तुति करनों ही केवल समुझो जावे हे, एसें ही केवल श्रवणादिकन्कुं पुरुषार्थ साधक बतायके भगवान्की स्तुति करी हे. अर्थात् भगवान् बडे कृपालु हें, साधन विना केवल श्रवणादिकसों ही पुरुषार्थसिद्धि करि देत हें इत्यादि. तात्पर्य ये हे के कभी भगवान् अपनें प्रमेयबलसों पञ्च साधन रहित केवल श्रवण–कीर्तनादिकन्सों भी सिद्धि देत हें, जेसें अजामिलकुं भगव–त्प्राप्ति भई. परन्तु शास्त्रोक्त प्रमाणानुसार तो ज्ञानमार्ग अथवा भक्तिमार्ग की रीतिसों पञ्चाङ्ग सहित अथवा पांचन्मेंसों कोई एक दृढ अङ्ग सहित हि श्रवणादिक भगवत्प्राप्ति करायवे वारे हें ये ही सिद्धान्त सिद्ध होवे हे।।१०३।।

एवं शास्त्रार्थम् उक्त्वा उपसंहरति अर्थोऽयमेव इति.

अर्थोयमेव निखिलैरपि वेदवाक्यैः रामायणैः सहितभारतपञ्चरात्रैः।।
अन्यैश्च शास्त्रवचनैः सह तत्त्वसूत्रैः निर्णीयते सहृदयं हरिणा सदैव।।१०४।।

इति श्रीश्रीकृष्णव्यासविष्णुस्वामिमतवर्ति श्रीवल्लभदीक्षितविरचिते
तत्त्वार्थदीपनिबन्धे शास्त्रार्थकथनं प्रथमं प्रकरम्।।

सर्वेषां प्रमाणानाम् अत्र एकवाक्यता. अन्येषु वाक्याभासाएव. रामायणानां बहुत्वं सर्वकल्पेष्वपि एवमेव प्रतिपादयन्ति इति ज्ञापनार्थम्. भारत–पञ्चरात्रयोः रामायणशेषत्वं चरित्रप्रतिपादकत्वाविशेषात्. अन्यानि शास्त्राणि पुराणरूपाणि. तच्छेषत्वं भारतादेः. तत्त्वसूत्राणि चतुर्लक्षणी मीमांसा. तैः सर्वैरपि ज्ञानं प्रेमसहितं कर्तव्यम् इति निर्णीयते. अन्यथा चतुर्दशविद्यानां सरस्वतीरूपत्वाद् एकनिष्ठता न स्यात्. तत्रापि सहृदयम्, भावोऽपि तस्याः एकत्रैव इति. अयम् अर्थः सरस्वतीभर्त्रैव ज्ञायतइति 'हरिणा' इति उक्तम्. कदाचिद् अन्यथा केचिद् वक्ष्यन्तीति तन्निराकरणार्थं 'सदा' इति।।१०४।।

या प्रकारसों शास्त्रार्थ अर्थात् भगवद्गीताशास्त्रके प्रतिपाद्य अर्थको निरूपण करिके प्रस्तुत प्रकरणके उपसंहारको उपक्रम करे हें.

श्लोकार्थ : सभी वेदवाक्य, महाभारत, पञ्चरात्र, आगम, रामायण तथा ब्रह्मसूत्र सहित अन्य शास्त्रके वचनन्में ये ही ब्रह्मवादको प्रतिपादन भयो हे, ये ही सिद्धान्त कह्यो गयो हे. भगवान् श्रीहरिने गीतामें या ही सिद्धान्तको सर्वकालिक सत्यके रूपमें निर्धारण कियो हे तथा उनको तात्पर्य भी या ही सिद्धान्तमें हे.

श्रीमदाचार्यचरण आज्ञा करे हें के मुख्य सिद्धान्त ये ही हे. यामें सब प्रमाणन्की एकवाक्यता हे, अर्थात् समस्त वेदवाक्य, रामायण, तदङ्गभूत भारत–पञ्चरात्र तथा समस्त पुराण–व्याससूत्र इन सब प्रमाणन् करिकें प्रेम सहित ज्ञान सिद्ध करनो ये ही निर्णय होवे हे. अन्य रीतिसों निर्णय कियो जाय तो चतुर्दशविद्यारूप सरस्वतीकी एकनिष्ठता कभी नहिं होय सके हे. तहां भी सरस्वतीको हृदय सहित भाव निजपति एक भगवान्में ही हे तासों पतिव्रताके अभिप्रायकुं जेसें पति विना अन्य कोउ नहिं जान सके हे एसें सरस्वतीके या प्रकारके अभिप्रायकुं सरस्वतिके भर्ता श्रीहरि ही जानें हे. ये एकादश स्कन्धमें भगवान्नें आज्ञा करी हे. ''इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन''. अर्थःया सरस्वतीके हृदयके अभिप्रायकुं मेरे विना अन्य कोउ नहिं जाने हे. तासों आगे होयवे वारे विद्वान् या सिद्धान्तसों विरुद्ध कहें तो सर्वथा नहिं माननो. सदा सर्वदा याहीकुं मुख्य सिद्धान्त समुझनो–।।१०४।।

प्रमाणबलमाश्रित्य शास्त्रार्थो विनिरूपितः।।
प्रमेयबलमाश्रित्य सर्वनिर्णय उच्यते।।

इति श्रीतत्त्वदीपनिबन्धटीकायां प्रकाशाख्यायां श्रीवल्लभाचार्यकृतायां प्रथमं प्रकरणम्।।

या प्रकार प्रमाणबलको आश्रय करिके शास्त्रार्थ अर्थात् गीतार्थको सम्यक् निरूपण भयो. अब प्रमेयबलको आश्रय करिके 'सर्वनिर्णय'नामको दूसरो प्रकरण कह्यो जाय हे.

इति श्रीमद्गोस्वामिवर्यरणछोडलालात्मजजैवातृकजीवनलालविरचितायां
साचोरापण्डितगोकुलदासेन लोके प्रकटीकृतायां
निबन्धतात्पर्यबोधिन्यां भाषाटीकायां
प्रथमं शास्त्रार्थप्रकरणं समाप्तम्।।
श्रीगोवर्द्धननाथो जयति।